RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23

॥ ओ३म् ॥

रेरे चातक सावधानमनसा
मित्र क्षणं श्रूयतामम्मोदा यहयो
हि सन्ति गगने सये तु
नेताहशाः । फेचिरिमिरादयन्ति
यमुधां गर्जन्ति केचिथा
यं यं पश्यसि तस्य तस्य पुरतो
मा धूदि दीनं पचः ।।५१।।

(नीतिशतकम्)

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥

अकरुणत्वमकारण-
विग्रहः परधने
परयोपिति च स्पृहा।
स्वजनवन्धुजनेष्व-
सहिष्णुता-
प्रकृतिसिद्धमिदं
हि दुरात्मनाम्।।५२।।

(नीतिशतकम्)

卐 वर्षम्-११ 卐 अंकः-०४ (२४४) 卐 १६ अगस्तमासः २०२१तः ३१ अगस्तमासः २०२१ पर्यन्तम् 卐 विक्रमसंवत्-२०७८ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२१ 卐 पृष्ठम्-८

## 75तमस्य स्वतन्त्रतादिवसस्य अवसरे रक्तदुर्गस्य प्राचीरतः प्रधानमंत्री देशं संबोधितवान्

नवदिल्ली स भारतस्य 75 तमस्य स्वतंत्रतादिवसस्य अवसरे प्रधानमंत्री नरेंद्र मोदी निरन्तरम् अष्टवां ध्वजारोहण क्अकरोत् स तेन राष्ट्रं संबोधयता उक्तम् आगामिपञ्चविंशतिवर्षेषु सर्वस्य सहभागिता, सर्वस्य विकासः, सर्वस्य विश्वासः इतिमूलमंत्रेण शत-प्रतिशतं विकासलक्ष्यम् अवाप्स्यते। एतल्लक्ष्यप्राप्तये प्रधानमंत्री 100 लक्षाकोटिराश्यात्मकस्य 'प्रधानमंत्रिगतिशक्तिलक्ष्यस्य रूपरेखां प्रास्तौत् स प्रधानमंत्री मोदी ग्रामस्य विकासे कृषकाणां जीवनं व्यवस्थितं कर्तु स्थापितेन लक्ष्येण सह बालानां पाठनाय सैनिकविद्यालयोद्घाटनस्य घोषणा अप्यकरोत् स स्वाधीन्यस्य 75 वर्षेषु देशस्य भिन्नभिन्नक्षेत्रं योजयितुं 75 संख्यकानि बंदेभारतरेलयानानि चालयितु घोषणाम् अकरोत् स प्रधानमंत्री आतंकवादस्य विस्तारवादस्य आपातिं प्रति उचितोत्तरं दातुं प्रतिबद्धतां पुनः आवर्तमानः चीन देशाय पाकिस्तानदेशाय च परोक्षसंदेशं दत्तवान् सजम्मू कश्मीरवर्तमानस्थितिम् उद्दिश्य प्रधानमंत्री अभाषत यत् तत्र स्थितिः सामान्या जायमाना वर्तते । तत्र विधानसभानिर्वाचनाय अधिकप्रतीक्षा न करणीया अभविष्यत् स तत्सार्धमेव पूर्वोत्तरसर्वकारः तेषां प्राथमिकतायाम् अस्ति है । ओलंपिकक्रीडासु उत्तयसफलतायै अपि प्रधानमंत्री मोदी सर्वेभ्यः प्रतिभागिभ्यः वर्धापनानि अदात् । तेषाम् उत्कृष्टप्रदर्शनं यूनः प्रेरितवत्स देशं संबोधयन् प्रधानमंत्री नरेंद्र मोदी देशस्य समक्षं महल्लक्ष्यं 2047 तमं वर्षं यावत् ऊर्जाक्षेत्रे आत्मनिर्भरः भवितुं स्थापितवान्। अस्मिन्अभियाने स्वच्छस्य ऐन्धनस्य महद् योगदानं भविष्यति । उल्लेखनीयं वर्तते यद् भारतम् अधुना स्वीयावश्यकतायाः 85% अपक्वतैलम् आयातरूपेण क्रीणाति यत्र 12 लक्षकरोड़मूल्यस्य वैदेशिकमुद्रा व्ययीभवति । अस्मिन् अवसरे रक्तदुर्गपरिसरे भव्यसमारोहस्य आयोजनं विहितम् स



## व्यासश्रीप्रायोजित राष्ट्रियमहा-कविसम्मेलनस्य शुभोद्घाटनं जातम्

ओडिशाराज्यस्य पुण्यशैवपीठवेदव्यासस्थस्य महर्षिव्यासदेवराष्ट्रियगवेषणाकेन्द्रस्य व्यासश्रीपरिवारेण प्रायोजितस्य दिनत्रयात्मक-राष्ट्रियमहाकविसम्मेलनस्य शुभोद्घाटनं 14-08-2021 तारिकायां सम्पन्नम्।



अखण्डसमृद्धभारतनिर्माणे संस्कृतमिति वार्त्तामाधारीकृत्य प्रवृत्तस्यास्य शुभोद्घाटनं विश्वप्रसिद्धसंस्कृतकविता 'भाति मे भारतमिति' इत्यस्य कवीनां पद्मश्रीरमाकान्तशुक्लमहोदयानां

शेषभागः द्वितीयेपुटे

केन्द्रीयसंस्कृतविश्वविद्यालयस्य (नई दिल्ली) कार्यवाहककुलपतिरूपेण विश्वविद्यालयस्य वरिष्ठाचार्यः प्रो. के के बी सुब्बरायुडूः कार्यभारं गृहीतवान् स प्रो. सुब्बरायुडूः अद्वैतवेदांतविभागे आचार्यः एवं केंद्रीयविश्वविद्यालयस्य विभिन्नपरिसरेषु निदेशकः अपि आसीत् । ज्ञातव्यं तावद् उक्तपदं पूर्वकुलपतेः प्रो. परमेश्वरशास्त्रिणः सेवानिवृत्तिकारणात् गतमासद्वयात् रिक्तः आसीत्।



## पतंजलियोगपीठे राष्ट्रहितं सर्वोपरि इति मंत्रेण सह समाचरितः पञ्चसप्ततितमः स्वतंत्रतादिवसः

हरिद्वारम्। तत्र स्वामिना रामदेवेश आचार्येण बालकृष्णेन पतंजलियोगपीठस्यविभिन्न परिसरेषु ध्वजारोहणं कृत्वा संपूर्ण स्वाधीनतासंकल्पनया सह देशवासिभ्यः स्वाधीनतादिवसस्य शुभकामनाः



प्रेषिताः । तत्र स्वामिना उक्तम् एतत्स्वातन्त्र्यस्य अमृतमहोत्सवे पतंजलियोगपीठपक्षतः देशवासिभ्यः उपहारं दातुमिच्छामः यत् प्रथमं वैदेशिककंपनियों द्वारा एतं राष्ट्रं आर्थिकवञ्चनया रक्षयामः,द्वितीयम् अस्माकं भारतीयशिक्षापरिषदः पतंजलिगुरुकुलस्य ,पतंजलिविश्वविद्यालयस्य पतंजलि-आयुर्वेदमहाविद्यालयस्य च द्वारा मैकालेशिक्षापद्धतिं समाप्य भारतीयशिक्षाव्यवस्थां प्रतिष्ठापयामहे। कार्यक्रमे आचार्यबालकृष्णेण कथितं यत् वीरवीरांगनाभ्यः नमोवाग् प्रशास्महे वयम। तेषां तपसा ,त्यागेन, आहुत्या च से देशः स्वातन्त्र्यम् अलभत।अस्मिन् अवसरे पतंजलिगुरुकुलस्य पतंजलिविश्वविद्यालयस्य पतंजल्यनुसंधानसंस्थानस्य छात्र-छात्राः समुपस्थिताः। तत्र वैज्ञानिकानां द्वारा देशभक्तिप्रस्तुतयः दत्ताः। कार्यक्रमे श्री एनपी सिंहः, प्रो. महावीर अग्रवालः,साध्वी देव प्रिया, श्री ललित मोहनः ,भगिनीअंशुलः , पारुलः,डॉ अनुराग वार्ष्णेयः, डॉ जयदीप आर्यः, स्वामी परमार्थदेवश्चेत्यादयः उपस्थिताः आसन्।


## उत्तर प्रदेश संस्कृत संस्थानम्

(भाषा विभाग उ0प्र0 शासन के नियंत्रणाधीन)

कक्ष सं0: 811, आठवां तल, इन्दिरा भवन, लखनऊ-226001, फोन कार्या: (0522) 4007012, 4330139
ई-मेल : upsanskritsansthanam@yahoo.com वेबसाइट : www.upsanskritsansthanam.in

पत्रांक : 270/संसं/2021 दिनांक 06.08.2021

### ई-अध्ययन सामग्री निर्माण हेतु प्रस्ताव का आमंत्रण

उत्तर प्रदेश संस्कृत संस्थान, लखनऊ द्वारा कम्प्यूटर के माध्यम से संस्कृत कक्षाएं संचालित किये जाने की योजना के अन्तर्गत उत्तर प्रदेश माध्यमिक संस्कृत शिक्षा परिषद् द्वारा निर्धारित पाठ्यक्रमों की ई-अध्ययन सामग्री (ट्यूटोरियल) निर्माण कराया जाना प्रस्तावित है। एतदर्थ मान्यता प्राप्त संस्थान/विश्वविद्यालय/महाविद्यालय से आचार्य/एम.ए. (संस्कृत) की उपाधि प्राप्त सम्बन्धित विषय के शोध छात्रों/शोधोपाधिप्राप्त छात्रों/समकक्ष उपाधि धारकों तथा अध्यापकों से **दिनांक 16 सितम्बर, 2021** तक संस्थान कार्यालय में प्रस्ताव आमंत्रित हैं। इच्छुक आवेदक अधोहस्ताक्षरी के कार्यालय में अपने प्रस्ताव के साथ निर्धारित पुस्तकों में से किसी एक पुस्तक का चयन कर उसमें से एक पाठ की ई-अध्ययन सामग्री का नमूना संलग्न कर प्रेषित करें।

प्रस्ताव प्रस्तुत करने के लिए पात्रता मानदण्ड, कार्य की प्रकृति, आवेदन की प्रक्रिया, ई-अध्ययन सामग्री तैयार करने हेतु दिशानिर्देश तथा आवेदन चयन की प्रक्रिया आदि के बारे में विस्तृत जानकारी संस्थान की वेबसाइट www.upsanskritsansthanam.in पर उपलब्ध है।

इस प्रस्ताव आमंत्रण को निरस्त करने अथवा इसमें संशोधन का अधिकार निदेशक, उत्तर प्रदेश संस्कृत संस्थान को होगा।

**निदेशक**

# दिल्लीसंस्कृताकादमीद्वारा स्वतंत्रतादिवसम् उपलक्ष्य अखिलभारतीयकविसम्मेलनस्य आयोजनम्

नवदिल्ली स स्वतंत्रतादिवसस्य उपलक्ष्ये दिल्लीसंस्कृताकादमीद्वारा अंतरजालीयमाध्यमेन प्रापयितुं संस्कृताकादमी एतादृशकार्यक्रमस्य आयोजनं करोति स संस्कृतनवोन्मेषः एकः तादृशः एव कार्यक्रमः आरब्धः।



अखिलभारतीयकविसम्मेलनम् आयोजितम् स कार्यक्रयस्य आरंभः श्री मनोज कुमार डिमरीद्वारा मंगलाचरणेन कृतम।तत्पश्चात् संस्कृताकादम्याः सचिवः, डॉ अरुण कुमार झा च सर्वेषाम् अतिथीनां श्रोतघ्णां स्वागतं कृतवन्तौ स स्वीये स्वागतभाषणे तेन काव्यशास्त्रप्रजापतिरूपेण कविसमाजाय एकः विशेषसंदेशः दत्तः तेनोक्तं यत् कविसम्मेलने देशस्य विभिन्नक्षेत्रेभ्यः महाकवीनां रचनाः अस्माभिः आस्वादनं करिष्यते। तत्पश्चात् दिल्लीसरकारस्य भाषाकलासंस्कृतिसचिवः , मो. आबिद अभाषत यत् संस्कृतभाषायाः साहित्यं बहुसमृद्धम् । कार्यक्रमस्य संचालकः, डॉ. परमानंद झा मुख्यम् अतिथिं संस्कृताकादम्याः उपाध्यक्षं डॉ. कांता भाटियाम् स्वागतीकुर्वन् उद्बोधनाय आगृहीतवान् स डॉ. कांता भाटिया प्रोक्तवान् यत् संस्कृतं जनजनपर्यन्तं येन देशे विदेशे च संस्कृतस्य प्रचारः प्रसारश्च जातः। तेन कविसम्मेलने उपस्थितकवीनां महत्वरूपे कथितं यत् कवये अष्ट गुणाः आवश्यकाः स डॉ रमाकांत शुक्लः, प्रो.राधावल्लभ त्रिपाठी इव कवयः तस्यां श्रेण्याम् आयान्ति। कवि सम्मेलने सर्वप्रथमं पद्मश्री डॉ रमाकांत शुक्लः, तत्पश्चात् प्रो.राधा वल्लभ त्रिपाठी, प्रो. भागीरथी नंदः, डॉ.हर्ष देव माधवः, डॉ. योगिता क्षत्रियः,प्रो. बिंदेश्वरी प्रसाद मिश्रः, डॉ. नवलता ,डॉ शंकर राजारमनः, डॉक्टर एच पूर्णिमा, डॉ बलराम शुक्लः ,डॉक्टर परमानंद झा चेत्यादिभिः काव्य पाठः कृतः । कार्यक्रमस्य अन्ते कार्यकारिणीसदस्येन डॉ आशुतोष दयाल माथुरेण सर्वेषाम् अतिथीनां श्रोतघ्णां धन्यवादः कृतः । ततः श्री मनोज कुमार डिमरीद्वारा शांतिपाठेन कार्यक्रमस्य समापनं विहितम्स

# शिरोमणिस्वामिकरपात्रिणः प्राकट्यदिवसस्य पावनवेलाम् उपलक्ष्य संगोष्ठी सम्पन्ना

धर्मसम्राजः शिरोमणिस्वामिकरपात्रिणः प्राकट्यदिवसस्य पावनवेलाम् उपलक्ष्य धर्मसंघशिक्षामण्डलदुर्गाकुण्डवाराणसीद्वारा वेबनारमाध्यमेन संगोष्ठी सम्पन्ना। तत्र अध्यक्षतां मेरे अयोध्याकोसलेशसदनपीठाधीश्वर जगद्गुरुरामानुजाचार्यः स्वामी वासुदेवाचार्यः विद्याभास्करमहाराजः अकरोत् , संचालनम् प्रो. ब्रजभूषण ओझा (व्याकरणविभागाध्यक्षः, संम्पूर्णानन्दविश्वविद्यालयः) कृतवान् । अवसरे बहवः वक्तारः धर्मसम्राजः करपात्रिणो विषये तत्र तद्व्यक्तित्वं कृतित्वं च आधारीकृत्य अभाषत। तत्र प्रो.सुधाकर दीक्षितः, प्रो.रामपूजन पाण्डेयः, जगजीतन पाण्डेयः, प्रो.धनञ्जय कुमार मिश्रः, प्रो.कमलेश झां ,डॉ शशिकान्त तिवारी चासन्। 'अधीतबोधाचरणप्रचारणैः' इत्युक्तिं स्वामीश्रीः पूर्णतया चरितार्थीकृतवान् । तस्य महाविभूतेः कथनं यत् शास्त्राणि पूर्णतया सुयोग्यगुरुमुखात् अध्येतव्यानि। पुनःतेषां गूढार्थः सम्यक्तया अवगन्तव्यश्च अवसरे अस्मिन् संस्कृतविश्वविद्यालयस्य, महाविद्यालानां च छात्राः,शिक्षकाः, प्रवक्तारः, अन्ये सामाजिकाः धर्मानुरागिणः समुपस्थिताः।

प्रथमपुटस्य शेषभागः

## व्यासश्रीप्रायोजित राष्ट्रियमहाकविसम्मेलनस्य....

सुललितगानेन सम्पन्नम्। विशालसंस्कृतकविसम्मेलनस्य प्रारम्भे वैदिकराष्ट्रमन्त्रपाठः तिरुपतीयवैदिकविदुषा डा दुर्गाशरणरथेन कृतः। ततः व्यासश्रीपरिवारस्य वरिष्ठसदस्येन आचार्यसत्यनारायणमहोदयेन फसिद्धोत्कलीयचोखिवृत्तेन समेषां कवीनां स्वागतं विहितम्। परिवारस्य मुख्योपदेष्टारः महामहोपाध्यायाः आचार्यहरेकृणशतपथीमहोदयाः त्रिदिनात्मककार्यक्रमस्य साशीर्वादवचोभिः सूचनां प्रायच्छन्। सारस्वतातिथिः सोमपाथसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः गोपबन्धुमिश्रः संस्कृतकविवैभवम्पास्थापयत्। संस्कृतकविप्रतिभा राष्ट्रसमृद्धये वैदिककालादद्यावधि प्रशस्तेति प्रस्तुतविशालकविसम्मेलनं प्रमाणमिति प्रोक्तवान्। छन्दोवद्धकवितापाठः, छन्दोमुक्तकवितापाठः, नारीकविगोष्ठी, कविगोष्ठी, शास्त्रचर्वणा च दिनत्रये समायोजयिष्यते। छन्दोवद्धकवितापाठानन्तरं आचार्यप्रफुल्लकुमारमिश्राणामाध्यक्षे दितीयसत्रं प्रारब्धम्। तत्र सारस्वतातिथिरूपेण पद्मश्रीराजेन्द्रमिश्रः सङ्गीतमयं भारतगौरवमाख्यापयत्। संकृतकाव्यरत्नं विना भारतस्य कल्पनं न, संस्कृतकाव्ये विश्वबन्धुत्वसन्देशः , चरित्रनिर्माणसन्देशः, कृषिवाणिज्यसमृद्धिश्च वर्तन्ते इति उक्तवान् । पद्मश्रीरमाकान्तशुक्लानां भारतवन्दनानन्तरं सत्रद्वये डा हरेकृणशतपथी, डा हरेकृणमेहेरः , डा हरेकृष्णपट्टजोषी, डा बनमाली विश्वालः,डा अरुणरञ्जनमिश्रः,डा व्रजसुन्दरमिश्रः, डा ब्रजकिशोरत्रिपाठी, डा बुद्धेश्वरषडङ्गी, डा सोमनाथदाशः , डा नारायणदाशः, डा सुशान्तराजः, डा नागराजप्रमुखाः विंशतिकविताः श्रावयामासुः। भारतवर्षस्य सर्वेषां प्रदेशानां विद्वांसः काव्यामृतपानेन भारतस्य पञ्चसप्ततितमस्वाधीनतादिवसस्य अमृतमहोत्सवं पालितवन्तः।

व्यासश्रीपरिवारमुख्येन डा बुद्धेश्वरषडङ्गिना संचालितस्य कार्यक्रमस्य संयोजना डासोमनाथदाश-डाप्रियव्रतमिश्राभ्यां कृता। अस्य सम्मेलनस्य पूर्तिसत्रं विशिष्टकविप्रमोदमिश्रवर्याणामाध्यक्षे 16-08-2021 सायं पञ्चवादने परिपालयिष्यते।।

## विद्यालयाः महाविद्यालयाः च कोविडनवाचारेण सह आरब्धुं निर्दिष्टाः

लखनऊ । कोरोणानियन्त्रणम् उद्दिश्य राज्यसर्वकारेण शिक्षणसंस्थानेषु पठनं पाठनं च आरभते । मुख्यमन्त्रिणा आदित्यनातेण शिक्षणससंस्थानानि आरब्धुं सिद्धतायाः निर्देशाः अधिकारिभ्यः दत्ताः । प्रथमचरणे माध्यमिकशिक्षायाः उच्चशिक्षायाश्च विद्यालयाः महाविद्यालयाः उद्घटिष्यन्ते । प्रदेशे अगस्तमासस्य पञ्चमदिनाङ्कतः स्नातके प्रवेशस्य प्रक्रिया आरप्स्यते । उच्चशिक्षणसंस्थानेषु सितम्बरमासस्य प्रथमदिनाङ्कतः अपि च माध्यमिकविद्यालयेषु अगस्तमासस्य षोडशदिनाङ्कतः पठनम् आरप्स्यते। परिषदीयविद्यालयेषु स्वच्छतया, स्वच्छार्कीकरणेन सह विद्यालयाः सिद्धाः क्रियन्ते ।

शिक्षणसंस्थानेषु नूतनसत्रस्य आरम्भः कोविडनवाचारेण सह भविष्यति । प्रथमचरणे पञ्चाशतप्रतिशतसङ्ख्यया सह कक्षाः अपि आरप्स्यन्ते। स्नातकस्तरे प्रवेशस्य प्रक्रिया अगस्तमासस्य पञ्चमदिनाङ्कतः आरब्धुं निर्देशाः दत्ताः । माध्यमिकशिक्षणसंस्थानेषु अपि ये छात्राः अग्रिमकक्षायां प्रोन्नताः, तेषां प्रवेशस्य प्रक्रिया आरप्स्यते । माध्यमिकशिक्षायाः विद्यालयाः अगस्तमासस्य पञ्चदशदिनाङ्कतः आरप्स्यते । स्वाधीनतादिवसस्य दिवसे 'स्वतन्त्रतायाः अमृतमहोत्सवेन' युक्तानि आयोजनानि भविष्यन्ति । अगस्तमासस्य षोडशदिनाङ्कतः अर्धसामर्थ्येन सह पठनम् आरप्स्यते । उच्चशिक्षणसंस्थानेषु कक्षाः सितम्बरमासस्य प्रथमदिनाङ्कतः आरप्स्यन्ते।

शिक्षणसंस्थानेषु स्वच्छार्क, अवरक्ततापमापकयन्त्रं, मुखावरणं चेत्यादिनां समुचिता व्यवस्था सुनिश्चेतुं निर्देशः राज्यसर्वकारेण दत्तः। द्विगजदूरतायाः अनिवार्यतानुसारं पूर्णसिद्धता अपि च कोविडनवाचारस्य कठोरतयापालनस्य निर्देशः प्रवृत्तः।

शिक्षणसंस्थानानां प्रारब्धेन सह अष्टावर्षीयोऽधिकायुषः विद्यार्थिभ्यः सूच्यौषधीकरणस्य विशेषशिविराणि आयोजिष्यन्ते । परिषदीयविद्यालयेषु शिक्षणारम्भस्य तिथिः सुनिश्चिता नास्ति, अपितु विद्यालयेषु कक्षारम्भस्य सिद्धतायाः निर्देशः प्रवृत्तः । सर्वेषु परिषदीयविद्यालयेषु स्वच्छतया, स्वच्छार्कीकरणेन सहैव शौचालयानां स्वच्छतायाः निर्देशः दत्तः । कक्षानाम् अपि स्वच्छतानिमित्तम् उक्तम् ।

## सर्वेभ्यः ओलम्पिकपदकवीरेभ्यः प्रतिभागिभ्यः पुरस्करिष्यति योगिसर्वकारः

गोरखपुर। मुख्यमन्त्री योगी शुक्रवासरे गोरखनाथमन्दिरस्य ब्रह्मलीनमहन्तदिग्विजयनाथस्मृतिसभागारे मन्दिरस्य पूर्वाञ्चलक्रीडाविकासमञ्चस्य संयुक्ततत्वावधाने आयोजितानां क्रीडकानां सम्मानसमारोहः सम्बोधयन्नासीत। तेनोक्तं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः प्रयासेन टोक्यो-ओल्मपिकक्रीडायां भारतस्य अधुनापर्यन्तं सर्वतोवृहद् क्रीडादलेन प्रतिभागः कृतः अपि च कोरोणाकालस्य प्रतिकूलपरिस्थितिषु अपि स्वकीयायाः प्रतिभायाः दर्शनं कारयद्भिः सर्वश्रेष्ठप्रदर्शनं कृतम् । अस्मिन् पर्याय भारतीयदलेन ओलम्पिकक्रीडायां सर्वश्रेष्ठप्रदर्शनं कृतम्। मुख्यमन्त्रिणा देशे क्रीडा-उन्नयनाय प्रधानमन्त्रिणः मोदिनः खेलो-इंडियाख्रअभियानस्य प्रशंसा कृता अपि च क्रीडकानां प्रोत्साहनाय जनप्रतिनिधिभ्यः, उद्यमिभ्यः समाजस्य सर्वेभ्यः जनेभ्यः अग्रे आगन्तुं घोषणा कृता ।

## मिशनशक्त्याः ( 3.0 ) अन्तर्गतं कार्यक्रमस्य अभवत् आयोजनम्

लखनऊ। महिलाभ्यः पुत्रीभ्यः च सम्मानशिक्षां दापयितुं तद्दिशि च उद्यतस्य योगिसर्वकारस्य वृहद् अभियानं मिशनशक्त्याः तृतीचरणं पुनः प्रदेशे आरभते । एतादृशसमये प्रशासनस्तरे सर्वसज्जता पूर्णा कृता। मुख्यमन्त्रिणः निर्देशानुसारं सर्वेषां वर्गाणां महिलानां पुत्रीणां च उद्धाराय उपयुक्तानां स्वर्णिमयोजनानां लाभः सूचना च प्राप्तुं शक्यं वर्त्तते। एतत् अवधाय कार्यक्रमाणां रूपरेखा सज्जीकृता । अभियानस्य प्रथमद्वितीयचरणयोः सफलतानन्तरम्



अगस्तमासस्य एकविंशतिदिनाङ्कतः मिशनशक्त्याः (3.0 ) नूतनचरणम् आरभते । एतत् अभियानं दिसम्बरमासपर्यन्तं चालयिष्यते ।

महिलाकल्याणविभागपक्षतः अगस्तमासस्य सप्तमदिनाङ्कतः अभियानस्य तृतीचरणान्तर्गतं कार्यक्रमाणाम् आयोजनं क्रियते । महिलाकल्याणविभागस्य निदेशकेन मनोजरायेन उक्तं यत् सर्वकारेण मिशनशक्तिसदृशं वृहद् अभियानम् आरभ्य तासां गतिक्रमान् विकासपथे वर्धितुं कार्यं कृतम्। राज्यसर्वकारः महिलानां सुरक्षायै, सम्माननाय, सशक्तिकरणाय च कृतसङ्कल्पः अस्ति । यस्यान्तर्गतं षमिशनख्र शक्त्याःष सकारात्मकः परिणामः दृष्टः। एतादृश समये विभागपक्षतः विभिन्नानां कार्यक्रमाणाम् आयोजनेन सहैव सर्वकारस्य स्वर्णिमयोजनाभिः महिलानां पुत्रीणां च योजनस्य कार्यं क्रियते । "हक-की-बात" इति कार्यक्रमेण उन्नतिं प्रति याता महिलानां ध्वनिः

महिलाकल्याणविभागपक्षतः मिशनशक्त्याः तृतीयाभियानस्य आरम्भः "हक-की-बात" इति कार्यक्रमेण अभवत् । यस्यान्तर्गतं सर्वेषु जनपदेषु आयोजितस्य संवादकार्यक्रमस्य माध्यमेन जिल्लाधिकारिणः जिल्लापरिवीक्षाधिकारिणः बालिकाभिः महिलाभिः सह घण्टद्वयं यावत् संवादं संस्थाप्य यौनशोषणं, लिङ्ग-असमानता, गृहे हिंसा, कन्ध्याभ्रूणहत्ध्या, कार्यस्थ्थले लिङ्गहिंसा, दहेज-उत्पीड़न चेत्यादिषु विषयेषु वार्ता कृतवन्तः। एतेषु विषयेषु महिलाभ्यः पुत्रीभ्यश्च संरक्षणं, सुरक्षा, परामर्शं चापि प्रदत्तम् । जनपदानां जिलाधिकारिणः वेबिनारख्र चौपाल-ऑनलाइनगोष्ठी-चलचित्रदूरस्थसम्मेलनद्वारा बालिकाभिः महिलाभिः सह वार्ताः कृतवन्तः।

योगिसर्वकारेण आयोजितः उत्तरप्रदेशे कन्याजन्मोत्सवः

मिशनशक्त्यान्तर्गतं बेटी-बचाओ-बेटी-पढ़ाओ-अभियानं प्रेरयितुम् उत्तरप्रदेशस्य जनपदेषु कन्याजन्मोत्सवः आयोजितः । मात्रे पुत्र्यै च उपहारदानेन सहैव लब्धजन्मनां पुत्रीणां सङ्ख्यायाः समरूपमेव वृक्षारोपणस्य कार्यम् अपि कृतम् । वदामि यत् एतेषां वृक्षाणां संरक्षणस्य दायित्वं पुरूषेभ्यः दापितम् ।

स्वावलम्बनशिविरमाध्यमेन योजनाभिः योजयिष्यन्ते महिलाः

प्रदेशे स्वावलम्बनशिविरद्वारा महिलाभ्यः पुत्रीभ्यः योगिसर्वकारस्य स्वर्णिमयोजनाभिः योजयिष्यते । अस्मिन् स्वावलम्बनशिविरे निराश्रितमहिला-अनुवृत्तियोजना, मुख्यमन्त्रिकन्यासुमङ्गलायोजना, उत्तरप्रदेशमुख्यमन्त्रिबालसेवायोजना चेत्यादिभिः सह अन्यासाम् योजनानां सूचना प्रदानेन सह आवेदनानि अपि एकस्मिन् स्थले एव पूर्णानि कारयिष्यन्ते । एषः स्वकीये एव अद्वितीयः प्रयासः अस्ति यत्र आवेदनकर्तारः, सत्यापनाधिकारिणः, अनुमोदनाधिकारिणः एकस्मिन् मञ्चे एव एकत्रिताः सन्तः प्रक्रिया एकस्मिन् दिवसे एव समाप्स्यन्ते । अनेन साकमेव मेगाख्रइवेंट-कार्यक्रमद्वारा बेटियों-से-पहचान-नारी-सम्मान इति विषये जागरूकताकार्यक्रमस्य आयोजनं सम्पूर्णप्रदेशे करिष्यते ।

# “प्रथमस्तरीय-आनलाईनसंसकृतसम्भाषणकक्ष्या”

संवाददाता- नूतनविष्णुः रेग्मी (प्रकृतिसाधुः)

लखनऊस्थ-उत्तरप्रदेशसंस्कृतसंस्थानेन प्रदेशे बहुत्र संचालितायाः विंशतिदिवसीय-(२० जुलै २०२१ तः १० अगस्ट २०२१ पर्यन्तम्)आनलाईनसंस्कृतसम्भाषणकक्ष्यायाः समापनसत्रसमारोहः ११/०८/२०२१ तमे दिनांके गूगलमीटमाध्यमेन



बहुत्र समाचरितः।तस्मिन् एव क्रमे गोरक्षपुरतः संयोजितस्य समापनसमारोहस्य मुख्यातिथिः जम्बूकश्मीरतः डा. मधुसूदनमिश्रमहोदयः आसीत् । कार्यक्रमस्यास्य संचालनं व्रजघट्टतः संस्थानस्यैव संस्कृत-प्रशिक्षकः श्रीः सतीशशर्ममहाभागः कृतवान्।सत्रस्य संयोजनमपि संस्थानस्यैव संस्कृतप्रशिक्षकेण नूतनविष्णुरेग्मिणा गोरक्षपुरस्य गोरक्षनाथसंस्कृतविद्यापीठतः कृतम्।तत्र सर्वादौ मंगलाचरणं कक्षायाः वयोवृद्धः छात्रः पीयूषटण्डनमहोदयः कृतवान्। योजनायाः सामूहिकसमुद्घाटनं तु लखनऊस्थ-यूपीसंस्कृतसंस्थानतः २०जुलै २०२१ तमे दिनांके जातमासीत।११/८/२१ दिनांके प्रथमस्तरीयसंस्कृतसम्भाषणकक्षायाः समापनसमारोहेऽस्मिन् मुख्यातिथित्वेन समागतः डा. मधुसूदनमहोदयः संस्कृतभाषायाः महत्वं चर्चयन् उक्तवान् यत् अस्माभिः पाश्चात्यसंस्कृतेः अन्धानुकरणं नैव करणीयमिति। तदनु छात्रेषु पीयूषमहोदयः, नीतामहोदया, अमिषमहोदयः, मदनमहोदयः, सीमामहोदया, नीलममहोदया, विप्लवमहोदयः, फणिराजमहोदयः,

योगेन्द्रमहोदयः, निधिमहोदया च अहमहमिकया अग्रे आगत्य स्वानुभवं संस्कृतभाषायामेव कथयितुं प्रयत्नं कृतवन्तः । तत्रैव केचन बालगीतं,देशभक्तिगीतमपि अगायन्। तदनन्तरम् संचालकः सतीशमहोदयः जनानां हृदये संस्कृतभाषां प्रति रुचिः कथमागच्छेत् इति विषयं कथयित्वा स्वस्य आनलाइनकक्षा-पाठनानुभवमकथयत। तत्रैव कार्यक्रमस्य संयोजकः नूतनविष्णुः अपि कक्ष्यायां स्वस्य पाठनानुभवं कथयित्वा संस्कृतभाषापठनलाभान् गणयित्वा सर्वान् प्रेरितवान्। द्वावपि संस्कृतभाषायां यथा प्रीतिः वर्धेत तथा उद्बोधितवन्तौ। एतेषां परीक्षा १०/८/२१ दिनांके आसीत्। ९९% छात्राः सम्यक् अंकान् प्राप्य उत्तीर्णाः अभवन्। एतेभ्यः प्रमाणपत्रमपि प्रदास्यते शीघ्रमेव। भविष्ये एते एव छात्राः संस्थानस्य द्वितीयस्तरीयसम्भाषणकक्षायामपि नामांकनं कारयिष्यन्ति। १५ अगस्ततः परम् आरभ्यमाणप्रथमस्तरीयकक्षायाः कृते एतैः छात्रैः स्वपरिचितजनद्वारा +91 9522340003 इत्यत्र मिस्डकाल कारयित्वा उत्तरप्रदेशसंस्कृतसंस्थानस्य वेवसाईटतः नामांकनमपि कारितमस्ति।वस्तुतः संस्थानस्य एतया योजनया देशस्य बहवः जनाः लाभान्विताः।यः कोऽपि अत्र +91 9522340003 मिस्डकाल कृत्वा आगतं सन्देशमुद्घाट्य तल्लिंक्द्वारा नामांकनं कारयितुं शक्नोति । एतत्महत्कर्मणः कृते योगीसर्वकारः, संसथानम्,संस्थानस्य अध्यक्षः, निदेशकः,योजनायाः क्रियान्वयनसदस्याः ,प्रशिक्षकाश्च सर्वे अपि धन्यवादार्हाः वर्धापनयोग्याः च सन्ति ।एषा प्रथमस्तरीयसंस्कृतसम्भाषणकक्षा उत्तरप्रदेशे विभिन्नेभ्यः स्थानेभ्य : संस्थानस्य बहवः प्रशिक्षकाः चालितवन्तः येन सहश्रश-छात्रा : लाभान्विताः जाताः।इत्थम् अन्ते शान्तिमन्त्रेण एषः कार्यक्रमः समाप्तिं गतः।

# शुभमदीक्षितमहभागया हिन्द्यांग्लभाषयोरनूदितस्य ‘वैद्यर्षिगौरवम्’ इतिनामकस्य महाकाव्यस्य विमोचनं भूतम्।।

ज्योतिर्विद्वत्सदेशराजशर्मा हिमाचलप्रदेशः।

पतंजलि योगपीठे हरिद्वारे आचार्य- बालकृष्णमहाभागस्य जन्मदिवस महोत्सवे शुभमदीक्षितमहभागया मासे काव्यत्रयस्य लोकार्पणेन यत्र पतंजलि- योगपीठस्यं ख्यातिः प्रसृता तत्र हिमाचल-प्रदेशोऽपि गौरवान्वितः संजातः। शुभमदीक्षितमहाभागाया अनुवादावदान-स्य भूरि भूरि प्रशंसां




हिन्द्यांग्लभाषयोरनूदितस्य ‘वैद्यर्षिगौरवम्’ इतिनामकस्य महाकाव्यस्य विमोचनं योगर्षिस्वामि- रामदेवमहाभागैःकृतम्। महाकाव्यस्यास्य रचना आशुकविना आचार्य- मनोहरलालार्येण कृता। काव्यस्य लोकार्पणं कुर्वद्भिः स्वामि वर्य्यैः निगदितं यत् आचार्य- मनोहरलालमहोदयः नैसर्गिकया काव्यप्रतिभया सम्पन्नो वर्तते, एतेषां विविधानि काव्यानि प्रकाशितानि, एकस्मिन्नेव कुर्वता योगर्षिणा कथितं यत् पुत्रीयं पितरमनुसरन्ती उत्तरोत्तरं प्रगतिमार्गे वर्धमाना हिमाचलप्रदेशस्य गौरवं वर्धयति इति हर्षस्य विषयः।विश्वब्राह्मणमहापरिषदः नारीशक्तेः प्रदेशाध्यक्षायै शुभमदीक्षितमहाभागायै परिषदःप्रमुखाधिकारिभिः वर्धापनानि दत्तानि,तत्र अभिषेकशर्म-सतीशशर्म-वत्सदेशराजशर्मप्रभृतिभिः मंगलकामना अर्पिताः।

# शुभमदीक्षितमहोदययाअनूदितस्य द्वितीयकाव्यस्य विमोचनम् आगरा नगरे सम्पन्नम्

(वार्ताहरः वत्सदेशराजशर्मा हिमाचलप्रदेशः)

चातुर्मासीय- मंगलकलशस्थापनासमारोहःश्रीशान्तिनाथदिगम्बरजैनमन्दिरपरिसरे आगरानगरे सम्पन्नः,प्रथितयशसां विद्वद्वन्दनीयानांश्रीप्रणम्यसागरमुनिवराणां व्यक्तित्वकृतित्वविषये



आशुकविना आचार्य मनोहरलालार्यवर्य्येण श्रीप्रणम्यमुनिगौरवम् इति काव्यं व्यरचि,तस्य हिन्द्यांग्लभाषयोरनुवादं शुभमदीक्षित-महोदया कृतवती,आगरानगरे हिमाचल- प्रदेशस्य यशःपताका शुभमदीक्षितमहोदया आन्दोलितवती।

अनया विश्वब्राह्मणमहासंघस्यापि गौरवं वर्धितम्,कांगडाख्या धरणिमपि दीक्षितमहोदया धन्यतमाम् कृतवती, अतः अस्मत्पक्षतोऽपि भूरिशो वर्धापनानि।

# प्रख्यातलेखिकायाः पद्मा सचदेवस्य मुंबईनगरे देहावसानं सञ्जातम्

मुंबईः डोगरीकवयित्र्याः, हिंदीविधानां प्रख्यातलेखिकायाः पद्मा सचदेवस्य बुधवासरे प्रातः मुंबईनगरे निधनं जातम्। अंतिमसंस्कारः गुरुवासरे प्रातः मुंबईनगरस्य जोगेश्वरी (पश्चिम) स्थाने भविष्यति। पद्मा सचदेवः जागरणआर्काइव पद्मश्री एवं साहित्य अकादमीसहितैःनैकैः पुरस्कारैः सम्मानिता एकाशीतिवर्षीया लेखिका रोगैः ग्रस्ता आसीत। जम्मू-कश्मीरराज्यस्य



राज्यपालः मनोज सिन्हा एवं केंद्रीय मंत्री जितेंद्र सिंहश्चौताभ्यां सहिताः अनेके साहित्यकाराः शोकं व्यक्तवन्तः किया है। 1940 तमे वर्षे जम्मूपुरमंडल ग्रामे संस्कृतविदुषः जयदेव बाडुवर्यस्य गृहे लब्धजन्मा पद्मा डोगरीभाषायां लिखिता प्रथमकविता चतुर्दशे वयसि प्रकाशिता आसीत्।

## पाठकानां कृते सूचना

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्कः रु.४८०/- ( व्यक्तीनां कृते ) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन ‘संस्कृत-संवाद’ इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C ) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# परमाणुशस्त्रप्रहारप्रभावविषयिणीभाषणप्रतियोगिताया आयोजनम्

इनरव्हीलक्लब लखीमपुरखीरीद्वारा ‘Nuclear weapons' इति किन्तावद्भवति एतस्य च दुष्प्रभावः कः किन्तावद् उपयोक्तव्यं वा इतिविषये आयोजितायां भाषणप्रतियोगितायां डॉ. सुशीला सिंहस्य (प्रवक्ता महाविद्यालयः)निर्देशने महाविद्यालयस्य सप्तभिः छात्राभिः प्रतिभागः कृतः ।यत्र रोशन शर्मा (स्नातकतृतीयवर्षम्) प्रथमस्थानं , अवंतिका मिश्रा (स्नातकद्वितीयवर्षम्) द्वितीयस्थानं,लक्ष्मी पांडेयः (स्नातकतृतीयवर्षम् ) तृतीय स्थानं च प्राप्य महाविद्यालयं गौरवान्वितं च अकुर्वन्। प्रतिभागिनीषु छात्रासु कुमारी रोशनी शर्मा, प्रियांशी शर्मा ,अवंतिका मिश्रा, पायल तिवारी ,लक्ष्मी




पांडे, नजर फातिमा ,नायसा बानो च आसन् । इयं प्रतियोगिता 06/ 8 /2021 दिनाङ्के ऑनलाइनमाध्यमेन आयोजिता। तत्र निर्णायकाः निर्वह्न जनपदस्य श्री पवन प्रताप सिंहः (कारागाराधीक्षकः) आसीत्।

# सम्पादकीयम्

**अमरभारतीप्रियाः! कोविदाः! सुकवयः!**

सादरं नमोनमः।

संस्कृतसंवादस्य नवांकमिममुपायनीकुर्वती अहमतीव प्रसीदामि। ज्ञानविज्ञानसम्पन्ना सुरभारती आदिकालादेव संसारं रक्षन्ती वर्तत इति को न वेत्ति। महतो हर्षस्य विषयो वर्तते यद् आगामिपक्षे संस्कृतदिवसमभिलक्ष्य सर्वत्र महोत्सवा भविष्यन्तीति। अनेकत्र चातुर्वेदपारायणस्य कविसमवायस्य गीतसंगीतस्पर्द्धानां वादविवादभाषणप्रतियोगितानां श्रीमद्भगवद्गीतारामायणादीनां च संस्कृतकाव्यानां स्वरः श्रूयमाणो वर्तत इति। अयमवसरो विशेषतो भारतवर्ष एव लभ्यते। रक्षाबन्धनपर्वणि सोत्साहं भारतीया वयं संस्कृतमहोत्सवमायोजयामः।

सम्प्रति तु बहवः संस्कृतसप्ताहनामकमायोजनं कुर्वन्तो दृश्यन्ते विद्वांसः। धन्या भारतीया संस्कृतिर्या विश्वकल्याणाय सदैव चिन्तयति। यामभिलक्ष्य अनेके संगोष्ठीनामायोजनं कुर्वन्ति। आधुनिकाप्राचीनकवीनां काव्यान्याश्रित्य समायोजकाः अनुदिनं संस्कृतसागरात् दिव्यतत्त्वानि गृहणन्तो विलोक्यन्त इति प्रमोदास्पदं वृत्तम्। ऑनलाइनबेबिनारद्वारा कोरोनाकाले अपि असंख्यानि आयोजनानि अभूवन्, सम्प्रत्यपि भवन्तीति संस्कृतयुगारम्भ एवेति नात्र संशयः।

अहं संस्कृतसंवादपक्षतो निवेदयामि यद् भवन्तः सादरं यथायोगं यथाशक्यं संस्कृतदिवसमभिलक्ष्य आयोजनानि कुर्वन्तु तत्समग्रमपि वृत्तजातं संस्कृतसंवादाय प्रेषयन्तु, येन संस्कृतजगतः सक्रियत्वं सर्वैरपि बुध्येत।

सम्मान्याः! अहं प्रायशः कविसम्मेलने संगोष्ठीषु विलोकयामि यत् श्रोतारः नाधिका लभ्यन्ते। परिगणिता एव वक्तारः कवयो वा समलंकुर्वन्तीति ज्ञात्वा चिन्तयामि। अस्तु सर्वे भवन्तः परिश्रमशीलाः निजनिजकार्येषु व्यस्ताः संस्कृतमेव वर्धयन्ति। अनेनैव संस्कृतसंवादः फलति वृत्तानि सम्प्राप्य। अस्तु गतेव कोरोना देशादिति मन्वाना: भवन्तः सावधानाः कार्येषु व्यापृताः भवन्तु। ईश्वरः सर्वेषां शुभानि कुर्यादिति भावयन्ती अहं शिवं प्रार्थये।

संस्कृतं राजतां भारते सर्वदा राजते भास्करः खे यथा बन्धवः।

संस्कृतिर्भारतीया सुखं शं शुभा सन्ददाना लसेत् कामये कोविदाः।

अमरवाणी विजयताम्।

सम्पादिका

## वेदामृतम्

**यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे।**
**इह धुमत्तमं वद जयतामिव दुन्दुभिः ॥५॥**

अर्थ-इस मन्त्र में उपमालङ्कार है। सब घरों में उलूखल और मूसल का स्थापन चाहिए जैसे शत्रुओं के जीतनेवाले शूरवीर मनुष्य अपने नगरों को बचाकर युद्ध करते हैं वैसे ही रस चाहनेवाले मनुष्यों को उलूखल में यव आदि ओषधियों को डालकर मुसल से कूटकर वूसा आदि दूर करके सार-सार लेना चाहिए ।।५।।

फिर वह किसलिए ग्रहण करना चाहिए, इस विषय का उपदेश अगले मन्त्र में किया है-

**उत स्म ते वनस्पते वातो वि वात्यमित्।**
**अथो इन्द्राय पातवे सुनु सोममुलूखल॥६॥**

अर्थ-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जब पवन सब वनस्पतियों, ओषधियों को अपने वेग से स्पर्श कर बढ़ाता है तभी प्राणी उनको उलूखल में स्थापन करके उनका सार से सकते और रस भी पीते हैं। इस वायु के विना किसी पदार्थ की वद्धि वा पुष्टि सम्भव नहीं हो सकती ।।६।।

फिर मूसल और उलूखल कैसे हैं, इस विषय का उपदेश अगले मन्त्र में किया है-

**आयजी वाजसातमा ता ह्युच्चा विजर्भृतः।**
**हरीड्वान्धौसि बप्सता॥७॥**

अर्थ-इस मन्त्र में उपमालङ्कार है। जैसे खानेवाले घोड़े, रत आदि को वहते हैं वैसे ही मूसल और ऊखरी से पदार्थों को अलग-अलग करने आदि अनेक कार्यों को सिद्ध करते हैं ७७६ फिर वे कैसे करने चाहिएं, इस विषय का उपदेश अगले मन्त्र में किया है

# अनन्तप्रणययात्रा



- प्रो. रमाकान्तपाण्डेयः
आचार्यः, साहित्यविभागे,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
जयपुरम् (राजस्थानम्)

( १ )

मा...ल...ति ! गृहस्य मुख्यद्वारमद्य पिहितं नास्ति किम्? कश्चन अश्वारूढः श्वेतोष्णीषधरः दर्शनीयगात्रः युवा अन्तः प्रविशति? पश्यैनम्? पृच्छ तावत् , कोऽयम्? कुतः किमर्थं चात्र समायातः? मृत्युशय्यायां शयानायाः कमलायाः त्रुटितान्येतानि वचनानि श्रुत्वा चकितचकिताः सर्वे द्वारदेशमपश्यन्। तत् तु पिहितमेव। न तत्र कश्चन अश्वारोही कस्यचिद् दृष्टिपथमायातः। मालती प्रत्युवाच- मातः! न कोऽप्यत्र दृश्यते, पिहितद्वारं गृहम् । न त्वया कापि शङ्का करणीया ह्य वयं सर्वे परिवारसदस्याः त्वत्सविधे वर्तामहे। मालत्या वचनेन निमेषमुन्मीलयितुं प्रायतत कमला, किन्तु शरीरे तावती शक्तिर्नासीत्, श्वासः प्रतिक्षणमवध ति, गाढान्धकारः नेत्रे आवृणोति स्म, श्वासासङ्गमात्रेण कमलाया जीवितम् अनुमातुं शक्यमासीत्। सहसा पुनरवदत् कमला-मालति ! अपि पश्यसि? स उष्णीषधरः मम शय्यायाः पार्श्वभागे स्थितोऽस्ति, अयं मम हस्तौ ग्रहीतुं यतते, पश्य तावत्, पश्य .... वारय एनम् । कोऽयम् ? कुतः समागतः ? कुत्र गन्तुमिच्छति ? मम हस्तौ किमर्थं गृहणाति, पश्य, पश्य, वारय एनम्, वा .... र .... य..... इत्युक्त्वा आकाशं पश्यन्ती कमला किञ्चित् आश्चर्येण हस्तौ उपरि प्रसारयितुमयतत, किन्तु हस्तौ उत्थापयितुं नैव अशक्नोत् .....सा आत्मदशायां हसितुं वाञ्छति स्म, तस्या दन्तहीने मुखे स्मितरेखेव काचिदलक्ष्यत ..... सा तमश्वारोहिणं निर्निमेषदृष्ट्या निभालयतीत्येव प्रतीयते स्म ..... महता प्रयासेन सा तं पर्यचिनोत्, तं निभाल्य कमलाया अक्षिभ्यां प्रावहन् केचन अश्रुबिन्दवः, सहसा सा स्मितानना समजायत, कमला तस्य स्वागताय उत्थातुम् ऐच्छत् , किन्तु अस्थिपञ्जरः साहाय्यं नाकरोत्, सा बुद्बुद-स्वरेण किञ्चिद् अवदत् , किन्तु न कोऽप्यवगन्तुमपारयत् । अश्वारोहिणं दृष्ट्वा कमलायाः स्मृतिपटले तज्जीवनस्य ताः सर्वा अपि घटनाः प्रत्यक्षीभूता, या न जाने कदाप्रभृति विस्मृतिगर्ते निलीना आसन्।

।।२।।

चन्द्रपुरग्रामे श्रीमुखशाण्डिल्यगोत्रस्य वेद-पुराणादिपटोः कर्मकाण्डनिपुणस्य त्रिपाठिनः शारदातनयस्य पुत्री आसीत् कमला। पिता यजमानानां गृहे पूजादिकं कृषिकार्यं च कृत्वा परिवारस्य उदरपोषणं करोति स्म। माता गृहकार्यव्यापृतापि कमलामेव लालयति। पित्रोरक्षणोः पुत्तलिकेव गृहाङ्गणे क्रीडन्ती कमला असकृत्तयोः मनो हरति। सा कदाचिद् धावति, कदाचित् पतति कदाचिच्च पितुः अङ्गुलिं गृहीत्वा बहिर्गन्तुं हठं करोति। पिता तस्या बालक्रीडां दर्शं दर्शं बहुवारं वदति स्म-आवयोः सौभाग्यादियं साक्षाल्लक्ष्मीरेव अस्मद् -गृहे जनिं लब्ध वतीति। पितुः क्रोडे स्थित्वा कमला कदाचित् तन्मुखाच्चतुरच्छागस्य कथां शृणोति कदाचिनीलवर्णस्य शृगालस्य कदाचिच्च मार्जारमूषकयोः। पुत्रीं पितुः क्रोडे दृष्ट्वा सुखमनुभवन्ती अपि कमलाया माता केवलमेतदेव निगदति स्म - भवतः एतादृशस्नेहेन इयं चापल्यमाचरति, मम वचनानि नैव शृणोति, कन्या परकीय एव भवति अर्थः। यस्मिन् दिने श्वशुरगृहं गमिष्यति तदा किं करिष्यति भवान्? पत्न्या वचनं श्रुत्वा झटिति अवदत् शारदातनयः - इयं मम राजपुत्री, अस्या विवाहं तु केनचिन् निष्णातेन विदुषा करिष्यामि, तत्र गत्वा मम पुत्री राज्यं करिष्यति। पत्युः वचनेन तृप्तिमनुभवन्ती मनसि हसन्ती अपि कमलाया माता तं कृतककोपेन अतर्जयत् - अहं जानामि कीदृशं राज्यमियं करिष्यति। अनया परगृहं गन्तव्यम्। अलम् अतिलालनेन।

एतत् सर्वं श्रुत्वाऽपि बहु किमपि अवगन्तुं नैव अपारयत् कमला। अस्मिन् वयसि पितुरङ्कमेवाऽभवत् तस्याः साम्राज्यम्। पितुर्मुखात् श्रुताः कथा एव तस्याः सर्वस्वमासन्। माता किं जल्पतीति न कदापि तद्बुद्धावरोहत्। पित्रा सह स्नानं तेनैव साकं भोजनं च समपादयत् कमला। यदा स यजमानगृहं गच्छति तदा तस्यैव मार्गे दत्तनयना कमला पितरं प्रतीक्षते। वयसः पञ्चमे वर्षे प्राथमिक-पाठशालायां प्रवेशात् पूर्वं सरस्वतीपूजनं समकारयत् पिता। पूजेयं ग्रामे पट्टिकापूजनमिति कथ्यते स्म जनैः। तदानीं काष्ठपट्टिका एव प्राथमिकशालाया विद्यार्थिनां हस्ते लेखनाभ्यासाय प्रादीयत। तां काष्ठपट्टिकां समवाप्य कमला हर्षप्रकर्षमन्वभवत्। अद्यप्रभृति सापि विद्यालयं गमिष्यतीत्येव समभवत् तस्याः प्रसन्नताया विषयः। पिता तु "मम पुत्रीं ग्रामाद् अक्षराभ्यासं कारयित्वा काशीं प्रेषयिष्यामि। तत्र नैकशास्त्राण्यधीत्य सा वैदुष्यं प्राप्स्यति"। इति मनसि विचार्य मुदितमानसः शारदातनयः प्रत्यहं गृहे कमलां माहेश्वरसूत्राणि अमरकोशं तर्कसङ्ग्रहं च अश्रावयत्। अतिप्रेम्णा पितुरुक्तपाठमनुकुर्वती सा पित्रोः हृदयं समधिकतरमानन्दयत् ।

अथैकस्मिन् दिने विद्यालयादागत्य कमला शयानं पितरं दृष्ट्वा मातरमपृच्छत् -पता किमर्थं शयितोऽस्ति मातः ? अपि तस्य भवति शिरोवेदना, स ज्वरपीडितो वास्ति? माता स्वयमपि किमपि न अजानात् पत्युः पीडाकारणम्। अद्य प्रातः स्नानादिकं विधाय यजमानगृहमगच्छत्। तत आगच्छन् मार्गे किञ्चित् शिरोवेदनामन्वभवत् शारदातनयः। सा पुत्रीमुक्तवती - किमपि नास्ति, ते पिता श्रान्तिमनुभवतीति सुप्तोऽस्ति। किञ्चित् कालानन्तरं स स्वस्थो भविष्यति। कमलायै मात्रोक्तं नैव अरोचत। सा पितुः खट्वायामुपविश्य तच्छिरः स्पृष्टवती। गाढं तपति पितुः शिरः। स ऊर्ध्वं श्वसिति, मुखं शुष्कम्, नेत्रयोः ज्योतिः मन्दीभूतम्। कमला पितरं बहुवारम् आकारयत्-पितः ! अहं विद्यालयात् समागतास्मि, किमद्य माहेश्वरसूत्राणि न श्रावयिष्यति भवान्? पितः! .. पितः! किमर्थं न किमपि वक्ति भवान्? कमला न किमप्युत्तरं प्राप्नोत्। सा ज्ञातवती - सामान्या नास्ति पितुः रुग्णता। किमिदानीं करवाणि, कमाकारयानि इति विचारयन्ती कमला वैद्यगृहं प्रत्यधावत्, सोऽपि गृहे नास्तीति विज्ञाय रुदती सा प्रतिवेशिनः आकारयत्। क्षणे तद्गृहे महान् जनसम्मर्दः अभवत्। अनेके तदुपचाराय विहितप्रयत्ना अपि निष्फला अभूवन्। क्षणानन्तरं शारदातनयस्य कण्ठाद् विचित्रः घर्घरध्वनिः समुद्भूत्, श्वासगतिरतीव वृद्धिं गता। केचन चिकित्सकं नीत्वापि समागताः, किन्तु कृतेऽप्युपचारे शारदातनयस्य प्राणरक्षा नाभूत्।

क्व सप्तवर्षदेशीया कुड्मल खकोमला कमला , क्व च कठोरतरवज्रपातः, किमिदं जातमित्यवगन्तुं मतिरेव नाऽऽसीत् कमलायाः। काश्चन ग्राममहिलाः तां क्रोडीकृत्य व्यलपन् काश्चन च मोहमुपगतायास्तन्मातुः मुखे जलमभ्यषिञ्चन्। चेतनां प्राप्य कमलामाता कराभ्यां वक्षःस्थलं ताडयन्ती भृशमरुदत्। किमेतत् सर्वमेतावच्छीघ्रं समपद्यत इति कमलाया बुद्धावेव नायाति। सहसा ग्रामजनाः तस्याः पितुः मृत्तिकां (शवं) गृहीत्वा प्राचलन्-तद्दृष्ट्वा कमला सचीत्कारमब्रवीत्-"मम पितरं नीत्वा न गच्छन्तु कृपया, तस्य महती शिरोवेदना विद्यते, सः स्वपिति । सुप्तं तं नीत्वा भवन्तः सर्वे कुत्र गच्छन्ति? अहमपि तेन सह आयामि" इत्युक्त्वा पितरमनुगन्तुं प्रवृत्तां कमलां महता प्रयासेन गृहीतवत्यः काश्चन महिलाः उक्तवत्यश्च -"तव पितरमेते चिकित्सार्थं नीत्वा गच्छन्ति। स्वास्थ्यं प्राप्य स पुनरागमिष्यति"। कमलाया मनसि महती भीतिः उदगच्छत्, प्रतिवेशिनीनां प्रबोधनवाक्येषु न तस्या विश्वास उदपद्यत।

अतीतो दिवसः, समागता घनान्धकारावृता महानिशा, पत्युः मरणाद् दुःसह दुःखाब्धि -निमग्ना कमलाया माता इदानीमपि चैतन्यं नैव प्राप्तवती। तस्याः शुष्कमुखे काँश्चन जलबिन्दून् पातयति मध्ये मध्ये कमला। सन्ध्याकालं यावत् प्रतिवेशिन्यः काश्चन कमलाया गृहे अभूवन्, सम्प्रति सर्वाः तामेकाकिनीं परित्यज्य गताः। कमला मातुर्दशां दृष्ट्वा रोदनमारब्धवती, सा द्वारदेशं गत्वा बहून् आकारयत् किन्तु अरण्यरोदनमेवाऽभूत् तस्या आह्वानम्। अन्धकारावृते तस्मिन् गृहे बिभेति स्म कमला। सा बहुबारं बहून् आह्वातुं प्रायतत, सर्वे निद्रामग्नाः, कोऽपि तस्या वचनं न शृणोति स्म। कमला कदाचित् मातरं पश्यति कदाचिच्च समग्रे गृहे प्रसृतं तमः। भीतभीतायाः कमलाया कुसुमकोमलहृदये सहसा विचारा उदपद्यन्त - लोकेऽस्मिन् शुभाशुभं कर्मफलं स्वयमेव भोक्तव्यं भवतीति पिता असकृदवदत् । इयं मम माता, अस्या रक्षणं मम कर्तव्यम्, कोऽपि मम कियत् साहाय्यं विधास्यति ? अहं कस्माद् बिभेमि? इदं मम गृहम्, अत्र कीदृशी भीतिः ? नाऽहं कस्यचिद् दयापात्रं भवितुमिच्छामि। मया स्वयं सर्वं सोढव्यम्, मयैव मातुः संरक्षणं करणीयम् । अद्यप्रभृति न कमप्याकारयिष्यामि। अहं स्वस्य स्वमातुश्च सर्वविधं दायित्वं निर्वक्ष्यामि। यः स्वीयं साहाय्यं करोति भगवानपि तस्यैव साहाय्यं करोतीति पितुरुपदेशः तत्स्मृतौ समागतः। तस्मात् क्षणात् कमला हृदये दार्ढ्यमधारयत्।

भग्नमनोरथा कमला विद्यालयं त्यक्त्वा मातरं पर्यचरत्। तस्याः सेवया माता कथञ्चित् स्वस्था सञ्जाता। मात्रा सह गृहकार्यं सम्पाद्य कमला क्षेत्रे कार्यमकरोत्। यजमानगृहेभ्यो यत्किमप्यन्नादिकं लभ्यते स्म, पितुः मरणानन्तरं तदपि न प्राप्यते। स्वक्षेत्रोत्पन्नमन्नमुभयोः उदरपूर्तये पर्याप्तं नाभवत्। कमला अन्येषां कृषकाणां क्षेत्रेषु कार्यं कृत्वा कथञ्चित् स्वीयं मातुश्च उदरमपूरयत्। अथैकस्मिन् दिने समागत्य ग्रामप्रमुखः शिवप्रसादः कमलाया मातरमाहूय अवदत् - ब्राह्मणि ! एतत् कथने यद्यप्यहं लज्जामनुभवामि तथापि भवत्या लाभं विज्ञाय किञ्चिद् वक्तुमीहे। मम आम्रवनिका भवत्या गृहं निकषा राजते। तस्या रक्षणे भवत्या नाधिकः श्रमः करणीयो भविष्यति। आम्रविक्रयणेन यो हि लाभः प्राप्स्यते तदावयोरुभयोः अर्धमर्धं भविष्यति। कमलाया माता शिवप्रसादस्य धौर्त्यमजानात्। अयं मृदुभाषी सन्नपि महान् विषधरः। कदापि श्रमिकाणां पारिश्रमिकं पूर्णतया न ददाति। तस्य गृहे आदिनं कार्यं कृत्वापि मखनियायाः पितामही बुभुक्षिता एव स्वपिति। सा वराकी बहुवारं रुदती स्वीयां व्यथां निवेदितवती , किन्तु शिवप्रसादोऽयं मम पत्युः यजमान आसीत्। अयं मया सह एतादृशं न व्यवहरिष्यति। द्वादशवर्षवयस्का मम पुत्री रात्रिन्दिवं परिश्रम्य कथञ्चित् उदरमात्रपूरणाय अर्जयति। सा इदानीं किशोरी, तस्याः शरीरे तान्येव जीर्णवस्त्राणि भवन्ति यानि तत्पित्रा आनीतानि। आम्राणां लाभेन तस्याः कृते वस्त्राणि क्रेतुं शक्यन्ते इति विचार्य सा ओमित्युक्तवती।

शेषभागः पंचमपुटे

चतुर्थपुटस्य शेषभागः

# अनन्तप्रणययात्रा....

शिवप्रसादस्य आम्रवनिकाया रक्षणे आदिनं व्यग्रा अभूत् कमलाया माता। ज्येष्ठमासे प्रचण्डं तपति भगवति भास्करे सा आम्रवनिकायामेव अभवत्। वृक्षच्छायायां क्वचित् कोणे उपविष्टा सा केवलं कमलामेव चिन्तयति, यो हि लाभः इतो लप्स्यते तेन कमलायाः कृते वास्त्राणि क्रीणीयाम्। पितुः स्नेहधारा तु तस्या दैवेनैव हृता, सम्प्रति अहमेवास्मि, मयैव तस्या मनोरथाः पूरणीयाः। एवं विचारयन्ती वराकी कमलामाता तत्रैव आम्रोपवने तप्तवायोश्चपेटा असहत। तस्याः शरीरं तापेन दग्धE, शीतलं जलमपि सा न तत्र पीतवती। कथञ्चित् स कालः समागतः, शिवप्रसादेन आम्रफलानि विक्रीय महाँल्लाभः सम्प्राप्तः। कमलाया माता तत्सविधे गत्वा स्वीयमंशमयाचत, शिवप्रसादः "भवत्या गृहमागत्य अवश्यं दास्यामी" -त्युक्त्वा बहुवारं तां प्रत्यावर्तयत् तस्या गृहम् इतः कमलाया मातुः शरीरे निदाघकारणाज्ज्वलनमनुभूतम्। समग्रं शरीरं तस्याः तप्तवायोः प्रभावात् ज्वलति स्म। कमला वैद्यैर्निर्दिष्टमौषधमलेपयत् तद्गात्रे किन्तु तस्या न कोऽपि लाभोऽनुभूतः। किञ्चित्कालानन्तरं सापि अकालमृत्युना अपहृता। अनाथां कमलां तस्या मातुलः परमानन्दः स्वगृहमनयत्।

॥३॥

परमानन्दः स्वभावमधुरः व्यवहारकुशलश्चासीत्। कमलां पुरो निधाय स पत्नीं कमलमतीं निरदिशत् - "भाग्यवति ! इयं मम भागिनेयी। दुर्दैवाद् अनाथा सञ्जाता, मम भगिनीपतिः शारदातनयः नैकशास्त्र - विशारदः पण्डित आसीत्। काले काले स अस्माकं बहुविधं साहाय्यमपि व्यधात्। इदानीं तत्पुत्री अस्माकं शरणं प्राप्तास्ति। इयं त्वया सुतानिर्विशेषतया पालनीया"। पत्युर्वचनं कमलमत्यै नारोचत। सा क्रुद्धसर्पिणीव क्रोध ज्वालया ज्वलन्ती न्यगदत् - समग्रे ब्रह्माण्डे त्वमेवैकः धर्मराजः। अन्येऽपि बहवः सम्बन्धिनः भवेयुः तव भगिनीपतेः। तेषु न कोऽपि दुर्भगामेनां ग्रहीतुं समागतः। अस्या जन्मदिवसात् कोऽपि सुखेन रोटिका न भुक्तवान् तस्मिन् गृहे। न जाने कस्मिन् नक्षत्रे जन्म लब्धवतीयं। पितरौ भुक्त्वा इदानीं मामपि भोक्तुं समागता। शृणोतु भवान् ख्र मम स्वीयाश्चत्वारः पुत्राः तिस्रश्च कन्यकाः सन्ति। तेषामेव उदरपूरणं महता कष्टेन भवति, एनां दग्धमुखीं को भोजयिष्यति ? अस्या अस्मिन् गृहे निवासात् न जाने किं भविष्यति ? जीवितां मक्षिकां को नु भक्षयेत्? महाननर्थः कृतः भवता। एनां नीत्वा क्वचिद् गङ्गातटे त्यक्त्वा आगच्छतु।

पत्न्या वचनकशाघातेन ताडितोऽपि परमानन्दः तां सान्त्वयितुमेव उपाक्रामत - "एवं न वक्तव्यं प्रिये, इयं मम भगिनीपुत्री, नास्ति काचिदपरा। गङ्गातटे अस्यास्त्यागः अस्माकं कुले महान्तं कलङ्कं जनयिष्यति। यथा अस्माकं सप्तसन्ततीनामुदरपूर्तिः भवति तथैव अस्या अपि भविष्यति। गृहकार्ये सर्वथा ते साहाय्यं सम्पादयिष्यति इयम्"।

गृहकार्यसम्पादनाय अस्या आवश्यकता अस्त्येवेति विचार्य कमलमती कमलां स्वगृहे स्थानं दत्तवती। दैवेन हता वराकी कमला रोदितुमपि नासीत् क्षमा। विकरालेऽस्मिन् काले किं कुर्यात् सा वराकी। मार्जारगृहीतकपोतशावक इव सा स्वजीविताशामत्यजत्। पितरौ स्मरन्ती केवलं मौनमास्थात् कमला। मातुलानी तामतर्जयत् - कीदृशी धृष्टासि ? गच्छ, रसवत्यामुच्छिष्टानि पात्राणि प्रक्षालयितुं सन्ति। तत् का प्रक्षालयिष्यति ? स्वर्गात् तव माता आगमिष्यति वा ? अहं गत्वा कुतश्चिद् अन्नमानयामि, तदैव ते कुशूलोपमोदरस्य पूर्तिः भविष्यति। तव पिता शारदातनयः नात्र किञ्चिदपि संस्थाप्य गतः। स्वयं मृतः, एनां मम भाग्ये विलिख्य गतः।

कमला गत्वा पात्राणि प्रक्षालितवती, अनन्तरं भोजनं निर्माय सर्वान् भोजयित्वा खिन्नमनसा स्वयमपि किञ्चिद् भोक्तुकामा एकां रोटिकां स्वीकर्तुं रसवत्यां गन्तुमैच्छत्। तद्दृष्ट्वा पुनः मातुलानी अतर्जयत् - "अयमेव संस्कारः तव तया स्वर्गवासिन्या सर्पिण्या मात्रा प्रदत्तः। अत्र बहिः स्थालिकासु यद् अवशिष्टं भोजनमस्ति तद् विषं नास्ति। सर्वं तदेव एकत्रीकृत्य त्वया भोक्तव्यम्। अनन्तरं सर्वत्र स्वच्छतां विधाय सायं पुनः भोजननिमित्तं चक्रिकां प्रचाल्य यवचूर्णं पेषणीयम्। अद्य वदामि, प्रतिदिनं वक्तुं मे शक्तिर्नास्ति, प्रातरुत्थाय गोमयं नीत्वा क्षेत्रे गन्तव्यम्, तत आगत्य चक्रिका चालनीया, पात्रप्रक्षालनं रोटिकानिर्माणं सर्वं त्वदधीनम्। सर्वं यथासमयं सम्पादनीयम्। आदिनं गृहकार्यं सम्पादयन्ती अहं श्रान्ता भवामि, मम पादयोः जायते महती पीडा, अतः शयनात् पूर्वं किञ्चित् मम पादौ संवाहनीयौ।

कमला मौनस्वीकृतिं दत्तवती। सा तैलिकयन्त्रं परितः पिहितदृष्टिपशुरिव रात्रिन्दिवं मातुल-गृहकार्यं निकषा भ्रमति। मातुलान्याः स्वरश्रवणमात्रेण वेपते तस्या देहयष्टिः। सर्वेषामुच्छिष्टभोजनमेव तस्या अंशः। रात्रौ स्वीयं भाग्यं निन्दन्ती सा कथञ्चित् स्वपिति। पुटपाकप्रतीकाशव्यथाकशाघातेन ताडितापि सा चतुर्दशवर्षीया रोदितुं कालं नैवाध्यगच्छत्। भागिनेय्या दुर्दशां दृष्ट्वा नितरां सीदति स्म परमानन्दस्य मनः , किन्तु सोऽपि पत्नीपरवश एव आसीत्। स किमपि वदति चेत् , कमलमती तस्या इतोऽप्यधिकं दुर्दशां करिष्यतीति विज्ञाय स सर्वदा मनसि रुदन् मौनमभजत्। अथैकस्मिन् दिने परमानन्दः व्यचारयत् - विवाहयोग्या जातेयं कमला। जाते विवाहे स्वगृहे सुखं प्राप्स्यति कमला। तद्योग्यवरान्वेषणतत्परेण मया भाव्यम्।

॥४॥

कमलाया विवाहः तस्याः पितुरिच्छानुसारेण विदुषा रामप्रतापेन समपादयत् परमानन्दः। रामप्रतापः व्याकरणादिशास्त्रेषु प्रवीणः श्रीमद्भागवतपुराणे कृतभूरिपरिश्रमः सदाचारवान् दर्शनीयो युवा। तं पतिरूपेण समवाप्य स्वात्मानं धन्यधन्यममन्यत कमला। येन दैवेन सा पित्रोरकालमृत्युना दुःखाब्धौ निमज्जिता तेनैव दैवेन प्रेमपयोधिरपि तत्सम्मुखे संस्थापितः। रामप्रतापस्य महती प्रतिष्ठा अभवत् चित्रकूटक्षेत्रे। श्रीमद्भागवतमहापुराणस्य प्रवचनेन स पर्याप्तं धनमर्जयति स्म। एकस्मिन् दिने स स्वप्रियया कमलया व्यचारयत् - "प्रिये ! मम प्रचुरं धनं विद्यते, कृषियोग्या पर्याप्ता भूमिरस्ति। अहं काँश्चन वटून् निवास ख्र भोजनादिव्यवस्थापूर्वकं गृहे अध्यापयितुमिच्छामि। तत्र पदे पदे ते साहाय्यमपेक्ष्यते। यदि अस्ति तेऽनुमतिस्तर्हि गुरुपूर्णिमायां गुरुकुलस्य श्रीगणेशः भवेत्"। तद्वचनानि समर्थयमाना कमला अवदत् ख्र "अतिकल्याणकरस्ते विचारः। अहं सर्वविधं साहाय्यमाचरिष्यामि। वटूनां कृते भोजनं तु अहमेव पक्ष्यामि। अस्माकं गुरुकुलादधीत्य वटवः सर्वत्र शास्त्रध्वजं ते कीर्तिपताकां चोत्तोलयिष्यन्ति। विद्यादानं श्रेष्ठतरं दानम्। विद्याविहीनस्तु सक्षात् पशुरेव भवति। भवतः सत्सङ्कल्पस्य कृते अहं वर्धापनततिभिः सभाजयामि भवन्तम्। भवान् सङ्गीतेऽपि दक्षः। शास्त्रेण सह वटवः सङ्गीतमपि अभ्यस्यन्ति। मम पितुः समीहाऽऽसीत् मामपि शस्त्राण्यध्यापयितुम् , दुर्दैववशाद् ममाध्ययनं तु नाभवत्। अत्र वटूनां साहाय्यं विधाय अहमात्मानं कृतकृत्यां सम्पादयिष्यामि"।

गुरुपूर्णिमावसरे रामप्रतापेन गुरुकुलस्य शुभारम्भः कृतोऽभवत्। नैके शास्त्ररसपिपासवो वटवस्तत्र प्रवेशं लब्धवन्तः। ते च सर्वे प्रतिदिनं ब्राह्मे मुहूर्ते सन्ध्यावन्दनं विधाय शास्त्राभ्यासम् अकुर्वन् तदनन्तरं कक्षाणां प्रारम्भः। कमला प्रातराशादिकं व्यवस्थापयन्ती वटुषु मातृवत् स्निह्यति स्म। गुरुकुलस्यास्य कीर्तिः सर्वासु दिक्षु वायुवेगेन प्रासरत्। रामप्रतापस्य शास्त्राध्यापनपटुत्वं श्रावं श्रावं नानादिग्देशेभ्यः शास्त्रपिपठिषवश्छात्रा गुरुकुलं प्रवेष्टुं सम्प्राप्ताः। सर्वमेतद् दृष्ट्वा भगवन्तं कृपाकूपारम् अकारणकरुणावरुणालयं प्राणमत् कमला। तादृशाद् अकल्पनीयदुःखसागराद् सन्तारिताऽहं पुनः सुखेन जीवनं यापयामि, कोऽस्ति त्वदतिरिक्त एतादृशः भक्तवत्सलः। प्रभो ! सर्वदा त्वया रक्षणीया दुखाब्धिमग्ना मानवा इत्येव प्रार्थयत कमला।

गच्छति काले कमला दौहृदलक्षणमधारयत्। आत्मनि भगवतः कृपावृष्टिं दृष्ट्वा हर्षनिर्भरमानसः रामप्रतापः प्रत्यहं रुद्रसूक्तपाठेन भगवन्तम् आशुतोषं समतोषयत। गुरुकुलच्छात्रान् अध्याप्य सः प्रतिदिनं कमलामपि श्रीमद्भागवतमहापुराणमश्रावयत्। कमलाऽपि सन्ततिसुखकल्पनामात्रेण आनन्दोदधिमालोडयति स्म। गुरुकुलस्य वातावरणे अपूर्वा काचिद् विच्छित्तिः व्यराजत। रामप्रतापस्य आराधना फलिताऽभूत्। शुभे नक्षत्रे कमला पुत्ररत्नं प्रासूत्। रामप्रतापः शास्त्रोक्तविधिना तस्य जातकर्म समपादयत्। कमलाया एतादृशे सौभाग्ये विश्वास एव न भवति स्म। सैवाऽहं, यस्याः पितरौ बाल्ये कालकवलितौ, मातुलान्या गृहे उच्छिष्टं भोजनमेव यस्या जीवनरक्षणोपाय आसीत्। एतादृशं सौभाग्यं भगवान् कदाचिद् दास्यतीति कल्पनापि नासीत् कमलायाः। सुतमुखदर्शनमात्रविह्वला सा रोदनमारब्धवती। तस्यै भगवता यदुपायनीकृतं किं तस्य पात्रता आसीत् तस्याम्। अहं नितरां पापिनी, यां मातुलानी सर्पिणीं वदति स्म, तया अयं सौभाग्यकालः लब्धः? नहि, नहि, नास्ति एतत् मम पापायाः सौभाग्यफलम्। मम पितुः तपश्चर्याया मम पत्यू रुद्राभिषेकस्य नित्यमाचरितस्यैव फलमेतत्। सुधांशुकरस्पर्शेणापि करीरव्रततौ कण्टकान्येवोत्पद्यन्ते, पयोबिन्दुसेचितापि न जातुचित् फलति विषलताऽमरफलम्। मम दुर्भाग्यग्रस्तायाः कुक्षौ तेजस्विनोऽस्य सुतस्य जन्म शिलायामभिशप्तायां दूर्वाङ्कुरप्ररोह एव। एवं बहुविधं मनसि चिन्तयन्ती कमला सहसा स्वस्कन्धयोः कस्यचित् करस्पर्शमन्वभवत्। सा शिर उन्नमय्य अपश्यत्- प्रसन्नमुखः रामप्रतापः तत्सविधे विद्यते। स तस्याः शिरसि हस्तं सञ्चालयन् अवदत् ख्र धन्योऽस्मि प्रिये ! तवानेन दाम्पत्योपायनेन नूनं धन्योऽस्मि। स्वर्गात् तव पुत्रं पश्यन्तः मम पितरस्ते अधमर्णतामङ्गीकुर्वन्ति। किमुपायनीकरोमि तुभ्यम् ? संसारे नास्ति किञ्चिद्वस्तु यत्तव पुत्रस्य तुलामधिरोहेत्। अहं पत्नीरूपेण त्वां प्राप्य सर्वथा धन्योऽस्मि प्रिये! रामप्रतापस्य वचनं श्रुत्वा गद्गदहृदया कमला किमपि वक्तुं नापारयत्। सा तस्य वक्षःस्थले शिरो निधाय रुदती पुत्रं तस्य क्रोडे स्थापितवती।

रामप्रतापस्य पुत्रजन्मोत्सवः समग्रे ग्रामे सोत्साहं समाचरितः। आबालवृद्धा ग्रामवासिनः हर्षमन्वभवन्। रामप्रतापेन सर्वेऽपि शास्त्रविहिताः संस्कारास्तस्य समपाद्यन्त। तस्य शिशोः नाम रामप्रतापेन श्वशुरस्य नामस्मरणार्थं "शारदादत्त" इति कृतम्। कमला शारदादत्तमपि निभालयति, गुरुकुलमपि। रामप्रतापस्य पाठकाले सा शारदादत्तं क्रोडे समुपस्थाप्य पाठं श्रावयति। श्रवणेनैव विद्यासंस्कारा आयान्तीति सा स्वपितुर्मुखात् श्रुतवती। तेनैव विश्वासेन सा स्वयं स्वपुत्रेण सह तत्रोपविशति स्म। रामप्रतापस्य गुरुकुले प्रतिवर्षं नवा वटव आयान्ति, समाप्तपाठाश्च स्वगृहं गच्छन्ति। शास्त्राध्यापने येषामभिरुचिरासीत् ते तत्रैव निवसन्तः अध्यापने रामप्रतापस्य साहाय्यमकुर्वन्। शारदादत्तः इदानीं पञ्चवर्षदेशीयो जातः। रामप्रतापस्य अनुज्ञया केचन शिष्याः तं अमरकोशेन सह बृहत्त्रयीमपाठयन्। वयसोऽष्टमे वर्षे शारदादत्तमुपनीय वेदारम्भो विहितः। स्वल्पेनैव कालेन शारदादत्तः सर्वासु विद्यासु नैपुण्यमध्यगच्छत्। स भाष्यान्तव्याकरणम् अधीत्य स्वाध्ययनेन सह वटूनामध्यापने पितुः साहाय्यमाचरत्।

कमलाया जीवनचक्रं सम्यक् चलति स्म। सा कदाचिद् गुरुकुले व्यापृता भवति, कदाचिच्च पुत्रस्य पत्युश्च शुश्रूषायाम्। तस्या एकोऽपि क्षणः दायित्वरहितः नासीत्। सौभाग्यमिदं समवाप्य कमला पूर्वजातं सर्वं व्यस्मरत्। कदाचित् स्वप्नवत् तत्सर्वं स्मृतौ आरुह्यते स्म , किन्तु रामप्रताप - शारदादत्तयोः सघनच्छायायां न तत्प्रभावो भवति स्म। जीवनं पर्वतक्रोडात् प्राप्तप्रभवाया नद्या अपरं नाम। यथा उपरिष्टात् तीव्रगत्या अधः पतति नद्याः प्रवाहस्तद्वज्जीवनमपि। कदाचित् सुखसागरे निमग्नः प्राणी पुनः दुःखसागरे निपतति। कमलायाः जीवनमिदानीं समतलभूमौ सान्द्रगत्या प्रावहत् परन्तु अकस्माद् एकस्मिन् दिने रामप्रतापः तीव्रज्वरपीडितः सञ्जातः। शिष्याः तं चिकित्सकसमीपं नीतवन्तः। तत्परीक्षणं विधाय चिकित्सकाः "अयं कर्करोगग्रस्तः" इति असूचयन् एतच्छ्रुत्वा कमलायाः पादतलात् भूमिः अपगता। सा पुनः तस्मिन्नेव उत्तालतरङ्गैस्तरङ्गायिते दुःखसमुद्रे न्यपतत्। नानाविधविचारचक्रैः ग्रस्ता सा वेपते स्म। शिष्याः रामप्रतापं गृहमानीतवन्तः। कमला रात्रिन्दिवं रामप्रतापं पर्यचरत्। एकदा रात्रौ तस्य आह्वानं श्रुत्वा कमला पृष्टवती- किं जलं ददानि ? कमला स्वीये अङ्के तस्य शिरः संस्थाप्य अरुदत्। रामप्रतापः अवदत् - "अलं रोदनेन प्रिये!, नहि, नहि प्रिये ! रोदनेन न किमपि सिद्ध्यति, कम्पन्ते मम गात्राणि, किमपि द्रष्टुं न पारयामि, कश्चन मम प्राणान् कर्षतीव। शिथिलायते देहबन्धः। प्रिये ! मम जीविताशा सम्प्रति समाप्ता। कुत्राऽसि. ... स्पृश मां .. त्वया शारदादत्तः सर्वतो भावेन रक्षणीयः। यामि प्रिये.... यामि .... पुनरावयोर्मेलनं भवतु.... अनुजानीहि ....माम्"। रामप्रतापस्य दशां विलोक्य कमला भूमौ न्यपतत्। शिष्याः सर्वे समवेताः। शारदादत्तः कदाचित् मातरं कदाचिच्च पितरं पश्यन् भृशं व्यलपत्।

॥५॥

रामप्रतापस्य मृत्युदुःखेन कमला विक्षिप्तेव सञ्जाता। इदानीं तस्या जीवनं तस्यै प्रयोजनरहितमेव प्रत्यभात्। सा "किमर्थमहं जीवामि मन्दभागा, प्रियं विना का गतिर्मदीया, स स्वर्गे विलसत्यहं च विषमदुःखभरितेऽस्मिन् संसारे जीवामि" इत्येवाऽचिन्तयत्। एवं विचारयन्त्यां तस्यां शारदादत्तस्य चिन्ता तामबाधयत्। स एकाकी किं करिष्यति संसारे? कः तस्य सहायकः? तस्य कृते मया जीवनं धारणीयम्। "मया शारदादत्तः सर्वतोभावेन रक्षणीय इति पत्युः आज्ञाऽस्ति। चिन्तासन्ततितन्तुजालनिविडहृदया कमला कदाचित् व्याकुला भवति , कदाचिच्च धैर्येणात्मानं धारयति। इयमेवाभवत् तस्या दिनचर्या। रामप्रतापस्य स्वर्गतस्य सप्तवर्षाणि अतीतानि। कमला नाद्यापि तं व्यस्मर्तुमशक्नोत्। रामप्रतापं विचिन्तयन्ती कमला गृहस्य एकस्मिन् कोणे उपविष्टा आसीत् , तदैव कश्चन शिष्यः आगत्य प्रणम्य च रामप्रतापस्य गुरोः पण्डित -रामानन्दस्य आगमनमसूचयत् - तन्नामश्रवणमात्रेण सङ्कुचद्गात्री कमला अवदत् - सादरमुपावेशय तान्। अहं जलपानादिकं व्यवस्थाप्य आगच्छामि। शिष्यस्तथा अकरोत्। कमला तत्कृते पाद्यमर्घ्यमाचमनीयं च दत्त्वा सादरं प्रणम्य अकथयत् - धन्यास्मि भवतः आगमनेन। अनाथेयं भवच्चरणकमलपरागसंस्पर्शात् सनाथा जाता। भवादृशमहापुरुषाणाम् आशीःकणिकैव मयि जीवनं सञ्चारयति। सा शारदादत्तं समाहूय अवदत् ख्र एते तव पितृचरणानां गुरुपादाः पुत्र ! त्वया साष्टाङ्गं प्रणम्याः। तान् सादरं प्रणम्य शारदादत्तः निर्गतः। अथ कमला पुनः पर्यपृच्छत् - गुरुपादैः इहागमनेन किमपि प्रयोजनविशेषेण सनाथीकृताऽहं स्वभावादेव वा? शिष्येषु अहैतुकीं कृपालुतां धारयन्ति गुरवः। रामानन्दः प्रत्यवदत् - "अस्ति कश्चन प्रयोजनविशेषः। रामप्रताप आसीत् मम परमप्रियः शिष्यः। अस्मद्दौर्भाग्यात् स दिवङ्गतः। अयं सम्बन्धः चिरस्थायी भवतु। उभयोः कुलयोः पारस्परिकं सौहृदं विलसत्विति विचार्य अहं स्वपौत्र्याः कृष्णायाः शारदादत्तेन विवाहं कर्तुमिच्छामि। यदि नास्ति ते कापि विप्रतिपत्तिः तर्हि स्वीक्रियतामेष प्रस्तावः"। कमला तु हस्तौ सम्पुटीकृत्य एतदेव उक्तवती - भवति सति काऽहं प्रस्तावस्य स्वीकर्त्री ? भवान् सर्वं साधयितुं स्वतन्त्रः।

शारदादत्तस्य विवाहः सम्पन्नः। रामानन्दस्य पौत्री गृहमागत्य कमलाम् अपीडयत्। इयं दुर्भाग्यशालिनी यं कमपि स्पृशति स एव मृत्युमाप्नोतीत्येव तस्या विश्वास आसीत्। बहुकालं यावत् कमला स्वपुत्रवध्वाः गृहकार्यादि ख्रसम्पादने सहाय्यमकरोत्। पुत्रवधूस्तां पापिनीं मत्वा तस्यां न स्निह्यति स्म। कमला तां बोधरहितां बालिकां मत्वा अक्षाम्यत्। कृष्णाया दुर्व्यवहारः दिनानुदिनं वृद्धिमगच्छत्। वृद्धा कमला शारदादत्तस्य मुखं निरीक्ष्य सर्वमसहत।

कालस्य गतिः न कस्यापि बुद्धौ आयाति । यदा कमला अस्मिन् गृहे समागता तदा सा आसीत् किशोरवयस्का। जीवनस्य सुखमयत्रैव लब्धवती सा, स्त्रीजीवनस्य सर्वोन्नतं मातृपदं लब्ध्वा धन्यधन्या सञ्जाता, रामप्रतापस्य प्रणयपवनस्तस्याः सर्वाणि दुःखानि पारेसमुद्रमनयत्। अद्य अस्थिपञ्जरमात्रमवशिष्यते तस्याः। सप्ततिवर्षेभ्यः पूर्वं मृत्युं प्राप्तस्य रामप्रतापस्य मुखमपि न स्मर्यते सम्प्रति वृद्धया कमलया। तस्याः पौत्री मालती न तां कदापि एकाकिनीं परित्यजति। इदानीं कमला रुग्णा, जर्जरितकाया सा स्वयमुत्थातुमपि न शक्नोति। मालती छायेव तामनुसरति। स बहून् चिकित्सकान् आहूय कमलायाः चिकित्सां कारितवती तथापि वृद्धायास्तस्याः स्वास्थ्यलाभो नाभवत्। अद्य स्वजीवनस्य अन्तिमक्षणं गणयन्ती कमला तमश्वारोहिणं सूक्ष्मतया निभाल्य पर्यचिनोत् - अयं मम प्रियतमः रामप्रतापः मां नेतुं समागतः। चिरात् प्राप्तं तं प्राणप्रियं पश्यन्त्याः कमलायाः नेत्रे सहसा निमीलिते। तस्याः श्वासोऽवरुद्धः। सर्वे अवदन् - " कमला दिवङ्गता" इति, किन्तु सा प्रियतमेन रामप्रतापेन सह अश्वमारुह्य अनन्तप्रणययात्रां प्रारभत।

# भारतस्वतन्त्रतामृतोत्सवेऽभिनन्दनम्!

-रमाकान्तशुक्लः
sarvashukla@gmail-com

भारतस्वतन्त्रतामृतोत्सवेऽभिनन्दनम्!
समस्तदेशवासिनां
कृते ब्रुवेऽभिनन्दनम्!
भारतस्वतन्त्रता-
सुधोत्सवेऽभिनन्दनम्!!

नवा नवा:सुयोजना: स्वदेशशंविधायिका:
दिने दिने सुघोषिता:
सखे! शतत्रयाधिका:।
भवन्ति भारते जना अनेकलाभसङ्गता:।
मृदस्य शोभते यथा
सुगन्धदायि चन्दनम्।।भारत...
न भारतेऽस्तु वृत्तिहीनता
कदापि जृम्भिता!
सुरक्षणं च शिक्षणं
नृणां सुनिश्चितं भवेत्।
उपद्रवा: सुयोजिता
न सन्तु दु:खदायिनो
महार्घता नियन्त्रितास्तु
धूलिरस्तु चन्दनम्! भारत...
कर्षकाश्च कार्मिका
विधायकाश्च सांसदा:
राष्ट्रशक्तिवर्धनाय
सन्तु भागधेयदा:।
अपव्ययो नियन्त्रित:
क्रियेत शासनस्थितै:
भवेत्तदा हि भारतं
समस्तलोकनन्दनम्!भारत...
स्वदेशवासिनां नृणां
कुतोऽपि नो भयं भवेत्
उदन्तदायका: प्रचारका
न सन्तु कस्यचित्।
न मध्यगा अपेक्षिता
भवन्तु कार्यसिद्धये
तदा ब्रुवे स्वतन्त्रता-
सुधा-महाभिन्दनम्।। भारत...
न शोषितो न पीडितो
न वञ्चितोऽस्तु कोऽपि ना!
समोऽपि राष्ट्रभक्ति-
भावना-परीत एधताम्!
हुतात्मनां स्वतन्त्रता-
प्रदायिनां करोम्यहं
विनीतचेतसा मुहु-
र्मुहु: शुभाभिनन्दनम्!! भारत...
क्रीडकाश्च सैनिकाश्चिकित्सका
नृरक्षका:
शिक्षकाश्च शोधका:
समाजसेविनस्तथा।
स्वच्छताविधायिन:
सरस्वती-सुसाधका:
समस्तदेशवासिनो
वदामि वोऽभिन्दनम्! भारत...
(रचना-तिथि: १३.८.२०२१)

ओ३म्
भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा
के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36-16 | मुद्रित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36-16 | मुद्रित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30-8 | मुद्रित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति सत्यार्थ प्रकाश के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

# राधां विना किमपि तत्त्वमहन्न जाने



-डा.प्रमोदकुमारशर्मा ( शास्त्रकवि: )
एसोसिएट प्रोफेसर:,
संस्कृतम्मेवम्प्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरूविश्वविद्यालये नवदेहली।

वंशीविभूषितकर! प्रभुगोकुलेन्द्र!
त्रायस्व मामरुणबिम्बफलाधरोष्ठ! ।
पूर्णेन्दुसुन्दरमुखाकृतिराधिकेश!
संसारजन्यभयदारुणदु:खकष्टात्।।१।।
नीलाम्बुजानन! हरे! नवनीरदाभ!
पीताम्बर! प्रचुरदैत्यविनाशकारिन्!।
मह्यम्प्रयच्छ शरणं करुणाकर! त्वम्
हे सुद्धयुपास्य! ननु ते शरणागतोऽहम्।।२।।
हे सुद्धयुपास्य! रसिकेश्वर! गोपकृष्ण!
गोपाङ्गनासु रमणाय रसप्रियासु।
हे श्यामलाङ्ग! भगवन्! हृदयान्मदीयात्
नैव प्रयाहि शृणु नम्रनिवेदनम्मे।। ३।।
नीलम्प्रकाशितवपुर्नवगोपिकानाम्
मध्ये स्थितं नु तव नन्दनकृष्ण! रासे।
वंशीसुशोभितकरं नवगात्रमेतत्।
शीघ्रम्मदीयहृदये कुरु सुस्थितं त्वम्।। ४।।
हे श्यामलाङ्ग! तव कोमलनेत्रदृष्टि:
नेत्रेषु मे सुमिलनादभवं विमूढ:।
संसारबन्धनमिदञ्च मया कुतश्चित्
प्रेमातिरेककरणादनुभूयते न।।५।।
हे सुद्धयुपास्य!तव
हास्यमुखन्निरीक्ष्य संस्पर्शजन्यसुखभोगविलासमत्त:।
कृष्ण!त्वदीयचरणामृतबिन्दुपानान्
मुक्तो भवामि परितो भवबन्धनेभ्य:।।६।।
हे राधिकेश!मुरलीधर!सुद्धयुपास्य!
वृन्दावने किमपि गुल्मलतौषधीनाम्।
कुञ्जेषु माम्मुरलिकाध्वनिवादनं त्वं
संश्रावयिष्यति कदा वद वासुदेव!।।७।।
हे श्यामसुन्दर! हरे! तव रूपमेतत्
सम्मोहयत्यखिललोकजनानलं हि।
किन्तु प्रभो! मम मनो विषयेष्वकस्मात्
सांसारिकेषु वद याति कथम्प्रवेगात्।। ८।।
सम्यग् बधान परितस्स्खलितम्मनो मे
कृष्ण! त्वदीयपदपङ्कजपञ्जरान्ते।
हे सुद्धयुपास्य! तव कोमलपादपद्मं
सम्प्राप्य को न जगति स्थिरताम्प्रयाति।।९।।
रे गोपिके! शिरसि ते नवनीतमेतद्
भारादध:पतति देहि कथं न मह्यम्।
हैयङ्गवीनमथ ते श्रमजन्यखेदं
सञ्चोरयाम्यहमतो नवनीतचौर:।।१०।।
सा गोपिका चतुरवाच्यवदद् व्रजेशं
तुभ्यन्ददामि नवनीतमिदन्न कृष्ण!
हे नन्दनन्दन! सखे! मम चित्तमेतत्
संलुण्ठितञ्झटिति चोरय मे मनोऽपि।।११।।
माधुर्यमन्दिरमहो रसरूपरम्यम्
प्रेमप्रतीतिमुखरं रुचिरं प्रशस्तम् ।
सम्मोहयत्यखिललोकमनांसि मन्ये
राधामुकुन्दयुगलं नवतान्तनोति।।१२।।
हे यादवेन्द्र!तव सा नवनीतलीला
गोगोपवृन्दनवभक्तिविचारशीला।
वृन्दावने सुरचिता नवरासलीला
संस्मर्यते हि शकटासुरनाशलीला।। १३।।
दुर्दान्तदुष्टशठकंसविनाशकारिन्!
गोवर्द्धनोद्धरणरक्षणकर्मदक्ष ! ।
मह्यम्प्रदेहि शरणं कुरु मङ्गलम्मे
तुभ्यन्नमोऽस्तु यदुनन्दन!सुद्धयुपास्य!।।१४।।
लोकोत्तरं सखिजनैस्सह वंशिशब्दं
श्रुत्वा किशोरवपुषो वसुदेवसूनो:।
वृन्दावनस्थरसिकैस्सह रासलीलां
दृष्ट्वा शिवस्समभवत्सखिरूपरूप:।।१५।।
गोपीश्वरो विविधभूतपतिर्महेश:
वंशीवटस्थयमुनातटपार्श्ववर्ती।
वृन्दावने व्रजजनैरपि चाद्य नूनं
सन्तूष्यते हि यमुनाजलधारयासौ।।१६।।
हे राधिके! तव सखा नवनीतचौर:
चौर्यं करोति मनसामपि सर्वपुंसाम्।
सञ्चोरितम्मम मनोऽपि वद प्रकामं
विज्ञापयाव चल तां जननीं यशोदाम्।।१७।।
सा राधिका तु सहसा ललितामुवाच
मैवं वद प्रियसखि! प्रियकृष्णचन्द्रम्।
कृष्णस्तु मे मदनमोहनचारुचन्द्र:
चौराग्रगण्यशरणं हि तमेव याव ।।१८।।
हे राधिके!चरणयोस्तव सेवकोऽसौ
कृष्ण: कथं समभवत्प्रथमो न जाने।।
तप्तं तप: कतमदित्यवदद्यशोदा
पुण्यस्य कस्य फलमेतकदस्ति राधे!।। १९।।
स्नेहेन रागभरितेन सुचिन्तनेन
तुष्टप्रसन्नमनसा भजनेन सम्यक्।
सम्पोषयत्यनुदिनन्निजभक्तदासीं
त्यक्त्वा न याति भगवाञ्जगदीशकृष्ण:।।२०।।
वृन्दावने सुललिते रमणीयकेऽस्मिन्
सख्यस्समा विचलिताश्चलितम्मनो मे।
रोषं विहाय मनसो हृदयेन हृद्ये !
हे राधिके! मयि कृपां कुरु सुन्दराक्षि!।।२१।।
रासश्वरी मम सदा हृदयेश्वरी त्वं
वृन्दावनेश्वरि!सखि! त्यजमानमेनम्।
राधे! त्वमेव शरणं मम जीवनस्य
राधां विना किमपि तत्त्वमहन्न जाने।।२२।।
भक्तैस्समस्तजगत:परितोऽभिवन्द्या
राधे! त्वमेव च सुधीभिरुपासनीया।
त्वामेव रासरसिके! व्रजवासिनश्च
नित्यम्भजन्ति च तथा सुखिनो भवन्ति।।२३।।
राधे! त्वदीयचरणाश्रयलब्धकीर्ति:
त्वर्धो भवामि जगति प्रसभं विना त्वाम्।
स्थित्या सहैव तव पूरय मां तदैव
पूर्णो भवामि भवती मम पूर्तिरस्ति।।२४।।
चन्द्रानने! नयनयोस्तव कृष्णकान्ति
राधे! त्वदीयकमनीयकपोलशोभा।
संदृश्यते मुहुरहो अधरस्य दीप्ति:
राधां विना मम मनस्स्थिरतां न याति।।२५।।
आनन्दकन्दहृदयाम्बुजमानिनी त्वम्
मानोन्नतिम्परिहर स्मितधारयाशु।
संसारसाररससौख्यनिधानधारा
हे राधिके! त्वमसि मां सुखिनं करोतु।। २६।।
राधिकारूपमाधुर्याम्मग्नोऽयं श्यामसुन्दर:।
विस्मृत्यात्मसंस्थानं राधाप्रेम्ण्यवगाहते।।२७।।
कंसं समाप्य मथुरां समवाप्य कृष्ण:
सस्मार गोकुलसखान् सरलास्सखीर्गा:।
गोवर्द्धनोद्धरणगोरसपानमार्गान्
सर्वा: मनोहरनिकुञ्जविहारलीला:।।२८।।
राधानुरागवशगो नवनीरदाभ:
राधेच्छया व्रजमहीं समलङ्करोति।
राधानुसारमुरलीध्वनिकर्मलग्न:
राधां विहाय न च गच्छति कृष्णचन्द्र:।।२९।।
राधाम्प्रियाम्प्रियसखीं हृदयेन कृष्ण:
स्मृत्वोद्धवम्प्रियसखं विबुधम्महान्तम्।
प्रोवाच सा हरिणशावकलोचना मे
नैवापयाति हृदयादधिदेवतेव।।३०।।

**वेदविज्ञानम्**

# ब्रह्माण्डोत्पत्तिः

-डॉ. रामदेवसाहूः
प्रोफेसर एवं विभागाध्यक्ष
विश्वगुरुदीप आश्रम शोधसंस्थानम्
जयपुरम् (राजस्थानम्)

जयपुरम् ( राजस्थानम्) ब्रह्माण्डस्योत्पत्तिः अद्याप्यत्यन्तं गूढरहस्यमस्ति। ब्रह्माण्डस्य मूलसर्जकः ब्रह्मैवास्ति। तद् ब्रह्म वेदपुराण-ब्राह्मण-आरण्यक-उपनिषत्-प्रभृतिषु ग्रन्थेषु श्अणोरणीयान् महतो महीयान्श् इत्युक्तम्। ब्रह्मण आरभ्य ब्रह्माण्डस्यास्तित्वोपलब्धिं यावत् ब्रह्माण्डाविर्भावविकासयोरष्टादश अवस्था भवन्ति। अस्य कथनस्य मुख्यं प्रमाणमस्माकं पुराणवाङ्मयं वर्तते, यत्र ब्रह्म इति प्रथमं पुराणं गण्यते, अन्तिमञ्च ब्रह्मरूपिणो बीजस्य चरमा परिणतिरेव ब्रह्माण्डम् इति मन्तव्यम्। वस्तुतस्तवेतान्यष्टादशपुराणान्येव ब्रह्माण्डोत्पत्तिमूलकानामष्टादशावस्थानां द्योतकानि सन्ति, येषु गूढवेदार्थमाध्यमेनायं वैज्ञानिको विषयः बोधितः। अल्पज्ञत्वात् सामान्यो जनः तज्ज्ञानं गृहीतुं न क्षमते। तथापि भगवता वेदेन अस्य विषयस्य ये संकेता विहितास्तरस्य रहस्यस्यापि पटाक्षेपो जायते। अस्तु, अत्र क्रमशः ता अवस्थाः प्रदर्श्यन्ते याभिरस्माकं ब्रह्माण्डस्योत्पत्तिः सम्भवति

१. स्वयम्भूमण्डलम् (प्रथमावस्था)

यस्यामवस्थायां इदं ब्रह्माण्डं विद्यमानं न भवति, सा अवस्था महाप्रलय इत्युच्यते। अस्यामवस्थायां ब्रह्मापि अणोरणीयान् वेविद्यमानं भवति। अस्मिन् रूपे स्वयं स्वसत्त्वोदद्योतकत्वात् तद् ब्रह्म स्वयम्भूरिति संज्ञां लभते। तद् अणीयःपरिमाणवत् स्वयंभूसंज्ञकं ब्रह्म स्वान्तः प्रकृत्या आवृत्तं भवति। अपि च सा तदीयान्तःप्रकृतिरपि स्वयंभूब्रह्मवदेव तदानीमव्यक्तावस्थायां विद्यमाना भवति। सैव मूलप्रकृतिरित्यप्युच्यते। ब्रह्मणोऽस्या अन्तःप्रकृतेः स्वरूपं मण्डलाकारं भवति, अतः तस्य ब्रह्मणस्तक्षेत्रं स्वयम्भूमण्डलमुच्यते। सत्यलोक इत्यप्यस्यैवापरा संज्ञा। स्वयम्भूमण्डले विद्यमानस्य ब्रह्मणः परिमाणं एकस्य परमाणोः षष्ट्युत्तरनवशततमांशतुल्यं भवति। अतएव तस्य न प्रत्यक्षादिभिः कैश्चिदपि प्रमाणैरनुभूतिःसम्भवति। न च किंविधैरपि यन्त्रैस्तदीयः साक्षात्कारः सम्भवः। अस्मात् स्वयम्भूमण्डले विद्यमानाद् ब्रह्मण एव ब्रह्माण्डस्योत्पत्तिर्जायते।

२. चिन्मण्डलम् (द्वितीयावस्था)

स्वयम्भूरणीयो ब्रह्मैव एकमात्रं सद्भवतीति कारणादात्मनः सत्त्वं शाश्वतं कर्तुं सक्षमो भवति। तदीयान्तःप्रकृतिरेव चित् संज्ञयोच्यते। चिदेवास्य ब्रह्मणस्तादृशी शक्तिरस्ति यया सः स्वयं शक्तिसहितो व्यक्ततामाजोति। चित्शक्तिः वृत्तिमयी भवति। अतः यथा पयसि स्वतः ऊर्मीणामाविर्भावतिरोभावौ भवतः, तथैव तस्यामपि चिच्छक्तौ अर्थात् ब्रह्मणोऽन्तःप्रकृतौ वृत्तीनामाविर्भावतिरोभावौ सम्भवतः। आभ्यां वृत्त्याविर्भावतिरोभावाभ्यां स्पन्द उत्पद्यते। अतएव यथाऽस्माकं हृदयं स्पन्दते यथा वाऽस्माकं नाड्यः स्पन्दन्ते तथैव ब्रह्माण्यात्मनोऽन्तःप्रकृत्या तजन्यस्पन्दस्याभासमनुभवति। तत्परिणामस्वरूपं स्वय भूमण्डलस्यान्तरेव एकस्यापरस्य मण्डलस्याविर्भावोभवति। तच्चिन्मण्डलमिति कथ्यते। ब्रह्मण एवेयं द्वितीयावस्था यस्यां ब्रह्माण्डस्य बीजाङ्कुरणमिदं विज्ञेयम्। इयमवस्थैव महत् इत्यप्युच्यते, बुद्धिरपि कैश्चिदुक्ता। अस्या अवस्थाया आविर्भावे सति ब्रह्म अणुपरिमाणं परित्यज्य महत् परिमाणं प्रत्यग्रेसरति। यतो हि चिन्मण्डलस्य आविर्भावात् स्वयम्भूमण्डलस्य परिमाणमपि समेधितं भवति। इदं हि चिन्मण्डलं वाचः सूक्ष्मपरमाणूनां संघातो वर्तते, यस्मिन् स्पन्दः शाश्वतिकतामापद्यते। अनहदनादरूपेण योगिनोऽस्यानुभवं विदधति।

३. वैद्युत्मण्डलम् (तृतीयावस्था)

चिन्मण्डले विद्यमानाया वाचः सूक्ष्मपरमाणुषु केचन परमाणवोऽणीयब्रह्मणः संसर्गात् धनात्मकमावेशमा जुवन्ति। एवमेव केचनान्ये तदीयान्तःप्रकृतिस्वरूपायाः चिच्छक्त्याः संसर्गात् ऋणात्मकमावेशं प्राप्नुवन्ति। एवं चेत्तेष्वेव परमाणुषुसंघर्षो भवति। तत्परिणामतः विद्युत् आविर्भवति। इयं विद्युदेव अग्नेः सूक्ष्मपरमाणून् उत्पादयति। तत्पश्चात् ते अग्निपरमाणवोऽपि स्वीयमायतनं कर्तुं प्रयतन्ते। तत्परिणामस्वरूपं चिन्मण्डलस्यान्तर्गतमेव एकमेवापरं मण्डलम् आविर्भवति। तद्धि वैद्युत्मण्डलमुच्यते। अस्य वैद्युत् मण्डलस्यैवापरं नाम तपोलोक इत्यस्ति। अयमेवाग्रिलोकोऽपि कथ्यते। अस्यामवस्थयां ब्रह्म अनिमयस्वरूपे परिणतं भवति। तदा तत् प्रजापतिः अथवा ब्रह्माऽपि उच्यते। अग्निगर्भा वाक् स्वरा उच्यते। इयं स्वरा प्रजापतेस्तस्य विशिष्टा शक्तिः। अस्मिन्नेव वैद्युन्मण्डले अनेःसूक्ष्मपरमाणूनां संश्लेषेण स एव ब्रह्मा प्रजापतिः अन्ततः सवितृरूपे परिणमति। अयं सविता अस्माकं दृश्यमानसूर्यवत् देदीप्यमानो भवति। तदानीं स्वरा अपि सावित्री रूपे परिणता भवति। ब्रह्मणो व्यक्तं स्वरूपमयं दर्शयति। इदमेवाक्षरं ब्रह्म उच्यते। यतो हि प्रलयावस्थायामपि अयं न नश्यति।

४. वारुणमण्डलम् (चतुर्थावस्था)

वैद्युन्मण्डले विद्यमानैराग्नेयैः परमाणुभिरस्तित्वं प्राप्तस्य सवितुस्तापेन उष्मणः प्रकाशस्य रश्मीणां चाविर्भावो भवति। एतत्त्रयमेव वेदे क्रमशः आयुः ज्योतिः गौश्च सम्प्रोक्तम्। उष्मणोऽत्यधिकं वृद्ध्या जलीयपरमाणवोऽस्तित्वं प्राप्नुवन्ति। यथा तापाधिक्येनास्माकं शरीरे स्वेद आविर्भवति, तथैव सवितृतापेन एषां जलीयपरमाणूनाभाविर्भावः सम्भवति। तदनन्तरं यथा यथैते जलीयाः परमाणवः वृद्धिं प्राप्नुवन्ति तथा तथा तेऽपि स्वीयमायतनं निर्मातुमुपक्रमन्ते। तत्परिणामस्वरूपं वैद्युन्मण्डलस्यान्तर्गतमप्येकस्यापरस्य नूनस्य मण्डलस्याविर्भावो जायते तद् वारुणमण्डलमुच्यते। अस्य वारुणमण्डलस्यैवापरं नाम वरुणलोकः अथवा जनलोकोऽप्यस्ति। यतो हि अस्य वारुणमण्डलस्य आविर्भावानन्तरं ब्रह्मणः चिच्छक्तौ जननक्षमतोत्पद्यते। अतः ब्रह्मणः सत्त्वगुणातिरिक्तं रजस्तमसोर्गुणयोराविर्भावो जायते।

मूलप्रकृतिरूपे सा चिच्छक्तिरपि स्वीयम् अस्तित्वं प्राप्नोति। अर्थात् त्रिगुणात्मिकेति रूपान्तरिता व्यक्ता भवति। तस्याः संश्लेषात् सवितृरूपे विद्यमाने ब्रह्मण्यपि आकर्षणशक्तिरुत्पद्यते। परिणामतः सविता स्वरश्मिभिः चिन्मण्डल वैद्युन्मण्डलयोः सूक्ष्मपरमाण्वीयांशानामादानप्रदानं कर्तुमारभते। सत्यामपि त्रिगुणात्मिकायां मूलप्रकृतेः सम्बन्धोऽविखण्डितरूपेण स्वयम्भूमण्डलचिन्मण्डल-वैद्युन्मण्डलैःसह वेविद्यमानो भवति। अतएव सा मूलप्रकृतिरेव अदितिरप्युच्यते। वारुणमण्डले विद्यमानेषु जलीयपरमाणुषु केचन परमाणवः तमोग्रस्ता भवन्ति, परिणामतः ते मादकतामाप्नुवन्ति। ते एव परमाणवः श्कश्यश संज्ञया अभिधीयन्ते। सत्त्वाधिक्यात् सविता स्वरश्मिभिस्तेष्वाघातं विदधाति, तान् शोषयत्यपि। तेषां शोषणात् पानात् वा सवितुरेवापरं नाम कश्यप इत्यप्यस्ति।

५. सोममण्डलम् (पञ्चम्यवस्था)

यदा सविता वैद्युन्मण्डलात्धनात्मकावेशयुतान् सूक्ष्माग्नेयपरमाणून् आकर्षति तदा तेषां संयोगः सत्त्वप्रभावितसूक्ष्मजलीयपरमाणुभिः सह यावदेव भवति तावदेव ते अमृतानिरूपे परिणता भवन्ति। अयममृताग्निरेव सोम इत्युच्यते। सूर्यरश्मयःनैरन्तर्येण सोमपानं कुन्ति, शाश्वती जीवनी शक्तिं च प्राप्तुं क्षमन्ते। अनेनामृतानिनैवापि शनैः शनैः वारुणमण्डलस्यान्तर्गतं स्वीयमायतनं निर्मातुमारेभे। तत्परिणामस्वरूपं एकस्यापरस्य नूतनस्य मण्डलस्य आविर्भावः समभवत्। तद्धि सोममण्डलमुच्यते। अमृताग्नेरेवापरं नाम चन्दा वर्तते। अतएवायं चन्दलोकः इत्यपि कथ्यते। सवितृचन्दमसोस्तेजोमयप्रकाशेनाप्लावितत्वादेव महर्लोकोऽयमित्यप्युच्यते। यतो ह्यत्राणुमात्रमपि तमस् न भवति। सवित्रा तमसः साकल्येन ग्रहणात् सदैव प्रकाशः ( महः ) एवात्र शाश्वतिकतामाप्नोति। इदमेवास्य परमं वैशिष्टयम्। सृष्ट्युत्पत्तिनिमित्तं सवितृरश्मिरूपेण विद्यमाना देवा अत्रैव प्राकृतं यज्ञमारभन्ते। सोमजन्यस्नेहनस्य परिणामस्वरूपम् अध्यात्माधिभूताधिदैवतानीनां मिथः सङ्गतिकरणं सम्भवति। इदमेव यज्ञस्य प्रथमं सोपानम् विज्ञातव्यम्।

अस्मिन् यज्ञे पुरोडाशरूपो हविष्यदार्थो भवति, अमृतागिरेव च अध्यात्माधिभूताधिसोमाख्यं संश्लेषण दव्यं गृह्णाति। अस्य प्राकृतयज्ञस्य परिणाम एव नाकः (स्वर्लोकः) विद्यते। अयं नाकः महर्लोकादधः संस्थितोऽस्ति।

६. भास्करमण्डलम् (षष्ठ्यवस्था)

यदा सविता वैद्युन्मण्डलाद् ऋणात्मकावेशयुतान् सूक्ष्माग्नेयपरमाणून् आकर्षति, तदा तेषां संयोगो यावदेव रजःप्रभावितसूक्ष्मजलीयपरमाणुभिः सह भवति तावदेव ते परमाणवो मानिरूपे परिणता भवन्ति। अयमेव मानिः वागनिरप्युच्यते। अमुमेव लब्ध्वा अव्यक्ताऽपि वाक् व्यक्ता भवति। अस्यैव माग्नेः वागनेर्वा सूक्ष्मपरमाणवो यदा स्वीयमायतनं कर्तुं प्रवर्तन्ते, तदा तत्परिणामस्वरूपं सोममण्डलस्य अन्तर्भागे एवैकस्यापरस्य मण्डलस्याविर्भावो भवति। तद्धि भास्करमण्डलम् इत्युच्यते। इदमपि मण्डलं सोममण्डलमिव सदैव प्रभामयं भवति। नाके विद्यमानाः सवितृरश्मयः यदा माग्निं वागनिं वा गृह्णन्ति तदा तास्वपि ध्वनिरुत्पद्यते। तत्परिणामस्वरूपम् ओङ्कारात्मकस्य वेदस्य आविर्भावो भवति। भास्करमण्डले उत्पद्यमानोऽयं वेदध्वनिरेवाद्यो ध्वनिर्विज्ञेयः। अस्मिन् वाचः स्वरूपमः पृथक्करणात् त्रिषु रूपेषु विभक्तं भवति, अतएवेयं वाक् त्रिंशद्धामा अप्युच्यते। अनयैव व्यक्तस्य वेदस्य श्रुतिः महर्षीणां भवति इत्यत्र नास्ति चित्रम्। यतो हि ऋषयोऽप्याग्नेयप्राणाः। अतः वेदवाचं सन्निधातुं सर्वाधिकं समर्था भवन्ति। अत्र वाचः शाब्दरूपे परिणतिर्भवत्यतएवेदं मण्डलमेवाकाशमण्डलमप्युच्यते।

# गुरुवन्दनसमारोहस्य समायोजन सम्पन्नम्

**वार्ताहरः - अनिलः शास्त्री**

कैथलम्। महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयः, कैथलम्, हरियाणा तथा च भारतीयशिक्षणमण्डलः इत्यनयो संयुक्ततत्त्वावधाने 'गुरुवन्दनसमारोहः' इत्यस्य आयोजनं तरङ्गमाध्यमेन कृतम् । कार्यक्रमस्य शुभारम्भः वेदविभागस्य सहायकाचार्येण डॉ. अखिलेशमिश्रमहोदयेन वैदिकमङ्गलाचरणवाचनेन कृतम् । कार्यक्रमे मुख्यवक्तारूपेण डॉ. जितेन्द्रभारद्वाजमहोदयः (कुलसचिवः -चौ. बन्सीलालविश्वविद्यालयः, भिवानी एवञ्च प्रदेशाध्यक्षः - भारतीयशिक्षणमण्डलः) आसीत् । कार्यक्रमे आगतानाम् अतिथिनां गणमान्यानां च परिचयं विश्वविद्यालयस्य कुलसचिवः प्रो. यशवीरसिंहमहोदयेन कृतम् । कुलसचिवमहोदयेन गुरोः महताविषये संक्षिप्तरूपेणोक्तम् । मुख्यवक्तामहोदयेन 'शिक्षाक्षेत्र-समाजोत्थाने च गुरोः भूमिका' विषये सर्वेषां मार्गदर्शनं कृतम् । महोदयेनोक्तं यत् वेद-पुराण-संस्कृतग्रन्थानाञ्च गुरुशिष्यपरम्परायुक्तं तक्षशिला-नालन्दाविश्वविद्यालयौ आविश्वस्य मार्गदर्शनं कृतवन्तः । महोदयेन पश्चिमीसभ्यता-संस्कृतिकारणेन भारते जायमानं परिवर्तनविषये तथा च सामाजिकसम्बन्धेषु परिवर्तनविषयेऽपि विस्तृतरूपेण वर्णितम् । शिक्षकाः समाजोत्थाने कथं मार्गदर्शनं कर्तुं शक्नुवन्ति अस्मिन् विषयेऽपि उक्तवन्तः । कर्त्तव्यपालनेन शिक्षकाः निजछविं समाजस्य पुरतः स्थापितुं शक्नुवन्ति । विद्यार्थिनः स्वशिक्षकं दृष्ट्वैवाचरणं कुर्वन्ति । तथैव अग्रे उत्तमाः विद्यार्थिनः पुनः उत्तमशिक्षकरूपेण समाजे कार्यं कुर्वन्ति । कार्यक्रमस्य समापने विभागाध्यक्षः डॉ. जगतनारायणमहोदयेन विश्वविद्यालयपक्षतः सर्वेषां धन्यवादज्ञापनं कृतम् । कार्यक्रमे भारतीयशिक्षणमण्डल तथा च संस्कृतविश्वविद्यालयस्य पञ्चाशत् कार्यकर्तारः उपस्थिताः आसन् । मञ्चसंचालनं ज्योतिषविभागस्य सहायकाचार्यः डॉ. नरेशशर्मामहोदयेन कृतम् ।



प्रो. राजकुमार मित्तल
अध्यक्ष
माननीय कुलपति
महर्षि वाल्मीकि संस्कृत विश्वविद्यालय, कैथल

डॉ. जितेन्द्र भारद्वाज
मुख्यवक्ता
कुलसचिव (सी.बी.एल.यू., भिवानी)
प्रदेशाध्यक्ष, भारतीय शिक्षण मण्डल

प्रो. यशवीर सिंह
निवेदक
कुलसचिव
महर्षि वाल्मीकि संस्कृत विश्वविद्यालय, कैथल

समस्तदेशवासिभ्यः
75 तमस्य
स्वतंत्रतादिवसस्य
हार्दिक्यः शुभकामनाः

सूचना-प्रसारण-मंत्रालयः
भारतसर्वकारः

Azadi Ka Amrit Mahotsav

जय-हिन्द

"देशस्य स्वाधीनतायाः अमृतमहोत्सव कोटिशः भारतवासिनां पर्व विद्यते । यत्र पूर्णभारतस्य परंपरा अपि वर्तते। स्वाधीनतासंग्रामस्य परिच्छाया अपि अस्ति। स्वतन्त्रभारतस्य गौरवान्विता प्रगतिः अपि वर्तते। एतत् आयोजनम् अस्माकं पञ्चसप्ततिवर्षाणाम् उपलब्धीः विश्वस्य समक्षं उपस्थापयितुं पञ्चविंशतिवर्षाणां विकासस्य रूपरेखायै संकल्पाय च प्रेरणास्वीकरणस्य अवसरः विद्यते स" - नरेन्द्र मोदी



davp 22201/13/0010/2122

कणे -कणे प्रतिहृदये च प्रथमं राष्ट्रम्

रक्तदुर्गस्य प्राचीरतः स्वतन्त्रतादिवससमारोहस्य प्रातः 6:25 वादने दूरदर्शनद्वारा साक्षात्प्रसारणम्

#AmritMahotsav
क्यूआरकोडस्कैनिंगद्वारा स्वाधीनतायाः अमृतमहोत्सवे भागं गृह्णन्तु।

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारी, डॉ. राधेश्यामअवस्थी
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलः- डॉ.सुन्दरनारायणझा, डॉ. सुरेन्द्रमहतो, डॉ. सन्नीकुमार, डॉ. संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।